श्रीरामलालकपूरन्यासपमित्या प्रकाशिता ग्रन्थाः

(१) वाक्यपदीयम्—भर्तृहर्युपज्ञवृत्तिसनाथं वृषभदेवटीकासंक्षेपसंयुतं प्रथमं काण्डम् ३)

(२) वाक्यपदीयम्—भर्तृहर्युपज्ञवृत्तिसनाथं पुण्यराजटीका सहितं द्वितीयं काण्डम् (द्वितीयभागे प्रथमखण्डः) १।।)

(३) Vedic Anthology—कतिपयानां वैदिकसूक्तानामाङ्गलभाषाविभूषिता श्रीमत्स्वामिभूमानन्दसरस्वतीकृता रुचिरा व्याख्या। १।।।)

मुद्र्यमाणग्रन्थौ

(१) यजुर्वेद भाष्यम्—श्रीमत्परमहंसपरिव्राजकाचार्य-महर्षिदयानन्दसरस्वतीस्वामिना प्रणीतं विवरणसहितम्

(२) वाक्यपदीयम् (द्वितीयभागे द्वितीयखण्डः)

प्राप्तिस्थानम्—

श्री० रामलाल कपूर ट्रस्ट

अनारकली,

लाहौर।

वाक्यपदीयम्

भर्तृहर्युपज्ञवृत्तिसनाथं पुण्यराजटीकासंयुतं

द्वितीयं काण्डम्

(द्वितीयभागे प्रथमखण्डः)

श्रीमत्या रामलालकपूरन्यासमित्या प्रकाशितम्

परिष्कर्ता-

चारुदेवः शास्त्री पाणिनीयः

प्रथमं संस्करणम्] विक्रमाब्दः १९९६ [मूल्यं सार्धरूप्यकम्

विद्या प्रकाश प्रेस में पृष्ठ १ से ९६ तक छपा,
केवल टाइटल पेज सन्तप्रिंटिंग प्रेस में प० सन्तराम हेसर के अधिकार से
ला० रूपलाल कपूर, मन्त्री रामलाल कपूर ट्रस्ट के लिये छपा।

एवं शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतम् । तस्य च साधारण्येन वाचकत्वं व्यवस्थापितम् । इदानीं मतभेदेन केषां चित्पदं वाचकमन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्य तावद्वितत्य स्वरूपप्रतिपादनाय द्वितीयकाण्डप्रारम्भः । तत्राचार्यमतभेदाश्रयेण तावद्वाक्योद्देशार्थमाह—

आख्यात[1]शब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥१॥
पदमाद्यं पृथक्सर्वं पदं[2] साकाङ्क्ष[3]मित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्याय[4]दर्शिनाम् ॥२॥[5]

एतेऽष्टौ[6] वाक्यविकल्पा आचार्य्याणाम् । तत्राखण्डपक्षे जातिः सङ्घातवर्तिनी, एकोनवयवः शब्दः, बुद्ध्यनुसंहृतिः इति त्रीणि लक्षणानि । खण्डपक्षे तु आख्यातशब्दः, क्रमः, सङ्घातः, पदमाद्यम्, पृथक्सर्वपदं साकाङ्क्षम् इति पञ्च लक्षणानि । अत्रापि सङ्घातः क्रम इत्यभिहितान्वयपक्षे लक्षणद्वयम् । आख्यातशब्दः पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमित्यन्विताभिधानपक्षे लक्षणत्रयमिति विभागः । इह च पदप्रकृतिः संहिता[7] इति प्रातिशाख्यम् । तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहितेत्यखण्डपक्षः । पदानि प्रकृतिर्यस्याः सेति खण्डपक्षः प्रादुर्भवति ।

तत्राख्यातशब्दो वाक्यमिति परस्ताच्छब्दार्थनिर्णय इति प्रकरणे[8] दर्शयिष्यति । यथा—

आख्यातशब्दे[9] नियतं साधनं यत्र गम्यते ।
तदप्येकं समाप्तार्थं[10] वाक्यमित्यभिधीयते ॥[11] इति ॥

केवलेन पदेनार्थः[12] इत्यादिना श्लोकाष्टकेन सङ्घातो वाक्यमिति दर्शयिष्यति ।

१. आख्यातः शब्दः—क ५, ग १.३.४ । आख्यातं शब्द—पा० सा०.

२. ०सर्वं—छ १.३,४, का०.

३. सापेक्षमि०—ग १.३.४, पा० सा०, वा० दे० सू.

४. न्यायवादिनाम—टीकाकोशाः, का०.

५. इदं श्लोकद्वयं पार्थसारथिमिश्रेण मी० श्लो० वा० व्याख्यायां ८६० तमे पृष्ठे, वादिदेवसूरिणा च स्याद्वादरत्नाकरे (४।१०॥) संगृहीतम । पदमाद्यमित्यादि पूर्वार्धं परात्रिंशिकाव्याख्यायामभिनवगुप्ताचार्य्येणोदाहृतम् । तत्र किमपि पाठान्तरं नास्ति

६. चाष्टौ—ज

७. निरुक्ते १।१७॥ ऋक्प्रातिशाख्ये तु संहिता पदप्रकृतिरिति विपर्यासेन पाठः.

८. वा० पा० २।३१६॥ इत्यतः प्रभृति.

९. ०शब्दो—छ १.३.४, का०.

१०. समासार्थं—छ १.२, ज । समाप्त्यर्थं छ ४

११. वा० प० २।३२८॥

१२. वा० प० २।४१॥

अथ वार्तिककारमीमांसकोक्तयोर्वाक्यलक्षणयोः किं समावेश उत भिन्नविषयतेति विचारार्थमाह—

निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितम् ।
साकांक्षावयवं तेन न सर्वं तुल्यलक्षणम् ॥३॥[1]

इह पदविधिः सामर्थ्ये सति परिभाषितः । तत्र सत्यपि पदानां सामर्थ्ये निघातादयः क्वचिन्नेष्यन्ते । यथा—अयं दण्डो हरानेन । ओदनं पच मम भविष्यति । ओदनं पच तव भविष्यति[3] इति । अत्रानेनेति सर्वनाम्ना दण्डस्य परामर्शाद्धरतिना सह तस्य सामर्थ्यम् । एवं च सति सामर्थ्ये तिङ्ङतिङः[4] इति निघातः प्राप्नोति । तेमयावेकवचनस्य[5] इति त्वादेशौ । न चेष्यन्ते । वाक्यभेदात् । सामर्थ्याभावेपीष्यन्ते । यथा—नद्यास्तिष्ठति कूले ।[6] शालीनां ते ओदनं दास्यामि[7] इति । अत्र नद्यास्तिष्ठतीत्यस्य च सम्बन्धानुपपत्तेः सामर्थ्यं नास्ति । इष्यते च निघातः । तथा शालीनां युष्मदश्च सामर्थ्याभावः । इष्यते च तेमयावेकवचनस्य इति युष्मदादेश इत्यालोच्य वार्तिककृता निघातादिव्यवस्थार्थमारब्धम्—समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः इति । एवं चायं दण्ड इत्यत्र सत्यपि सामर्थ्ये नास्ति निघातस्य प्रसङ्गोऽवध्यवधिमतोर्भिन्नवाक्यतयावस्थानात् । अस्तीत्यध्याहारेण ह्ययं दण्ड इत्येकं वाक्यम् । हरानेन इति च द्वितीयं वाक्यम् । नद्यास्तिष्ठतीत्यादौ त्ववध्यवधिमतोः पदयोः सामर्थ्याभावेप्येकवाक्यव्यवस्थितौ प्रवर्तन्त एव निघातादय इति नास्त्येषामव्यवस्था । समानवाक्ये निघातादयो वक्तव्या इत्युक्तम् । तत्र वाक्ये विज्ञाते समानवाक्यत्वं ज्ञायत इति प्रसङ्गात्तत्र वार्तिककारेणादावेव वाक्यलक्षणमुक्तम्—आख्यातं साव्ययकारकविशेषणं वाक्यम् । एकतिङिति[9] च इति ।

एवं च मीमांसकोक्तेनास्य सर्वत्र समावेशोऽस्ति न वेति विचार्यते । शास्त्रे वाक्यकारेण निघातादिव्यवस्थार्थं यद्वाक्यलक्षणं परिभाषितं तेन मीमांसकोक्तं वाक्यलक्षणं सकलं न तुल्यलक्षणम् । साकाङ्क्षावयवम् इत्यनेन मीमांसकोक्तं वाक्यलक्षणं सूचितम् । तत्र क्वचिदेते समाविशतः । यथा—नद्यास्तिष्ठति कूले । शालीनां त ओदनं दास्यामि इति । अयं दण्डो हरानेन । ओदनं पच तव भविष्यति इत्यादावसमावेशः ।

१. साक्षाद्बहुविधानेन—क२,ख । आकाङ्क्षावयवं तेन—ग१.३.४, साकाङ्क्षावयवं तेन इति टीकापाठः—ख३ (पृष्ठप्रान्ते).
२. पा० ३।१।३
३. पा० महा० भा० २।१।१ सूत्रे ११ वार्तिके ।
४. [illegible]
५. [illegible]
६. पा० महा० भा० २।१।१ सूत्रे १३ वार्तिके ।
७. पा० महा० भा० २।१।१। सूत्रे १३ वार्तिके । तत्र ददामि इति पाठः ।
८. पा० ८।१।२२॥
९. पा० महा० भा० २।१।१।वा० ११॥
१०. द्रष्ट० (२।८) इत्यत्र टिप्पणं द्रष्टव्यम् । आख्यं तु एकतिङ् इत्येव वार्तिकपाठीयम् ।

मीमांसकवाक्यलक्षणसमाश्रयणेनात्र प्राप्नुवन्ति निघातादयः । एकप्रयोजनत्वात् । न चेष्यन्ते । तस्माद्वार्तिककारीयमेव वाक्यलक्षणं ज्यायः ॥३॥

अथात्र प्रसङ्गान्मीमांसकवाक्यलक्षणमर्थद्वारेण प्रदर्शयितुमाह—

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥४॥[2]

[1]भेदे विभागे विशेषजिज्ञासायां यत्साकाङ्क्षावयवम् । अविभागे तु परानाकाङ्क्षाः शब्दाः पदानि यस्मिन् तत् परानाकाङ्क्षशब्दकम् । कर्मप्रधानं क्रियापदप्रधानमित्यर्थः । तस्यैव प्रधानाभिधेयप्रयुक्तत्वादित्यभिप्रायः । गुणवद् विशेषणपदयुक्तम् । एकार्थम् एकप्रयोजनम् ॥४॥

इदानीं वार्तिककारीयस्य वाक्यलक्षणस्याव्याप्तिमाशङ्क्याह—

सम्बोधनपदं यच्च तत् क्रियाया विशेषकम् ।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥५॥[3]

व्रजानि देवदत्तेत्यत्र देवदत्तेत्येतत्पदं नाव्ययं न च कारकं नापि तद्विशेषणमिति वाक्यलक्षणेनासंगृहीतत्वादाष्टमिक आमन्त्रितस्य च[4] इति निघातो न प्राप्नोतीति चोद्यम् । आख्यातं साव्ययं सकारकं सविशेषणमिति सामान्येनाभिधानात्सक्रियाविशेषणस्याप्याख्यातस्य वाक्यतेत्यदोषः । तथा हि । अत्र सम्बोध्यमानदेवदत्तविषया व्रजतिक्रिया असम्बोध्यमानदेवदत्तविषयायाः सम्बोध्यमानयज्ञदत्तविषयाया वा पृथगेवेति विशिष्टैवात्र व्रजतिक्रिया ।

क्रियायाश्च विशेषणं कदाचित्सामानाधिकरण्येन भवति । यथा—सुष्ठु करोति । शोभनं करोतीति । अत्र करोत्यर्थस्य सुष्ठ्वित्यादिविशेषणविशिष्टस्यैव प्रतीतेः सुष्ठ्वित्यादीनां करोत्यादिक्रियया सामानाधिकरण्यम् । एवं चासत्त्वभूतायाः क्रियाया विशेषणमित्यसत्त्वप्रधानत्वाल्लिङ्गसर्वनाम्ना नपुंसकेन योगः । क्रियायाश्च निर्वर्त्यत्वात्कर्मत्वमिति न्यायसिद्धमेव कर्मत्वं नपुंसकता चेति क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च[5] इति नारम्भणीयं वचनम् ।

वैयधिकरण्येनापि विशेषणं भवति यथा—व्रजानि देवदत्त इति । अत्र हि देवदत्त व्रजानीति देवदत्तस्य व्रजनक्रियायाश्च सामानाधिकरण्यं नास्ति । केवलमा-

१. °मिष्यते—टीकाकोशाः, का०.
२. व्यक्तिविवेके ७ पृष्ठ उद्धृतम् । तत्र क्रियाप्रधानम् । इष्यते इति च पाठभेदौ । प्र० कौ० प्रसादे ४६६ पृष्ठे प्युदाहृतेयं कारिका । तत्र किमपि पाठान्तरं नास्ति ।
३. पदमञ्जर्यां ३३९ पृष्ठ उदाहृतम् । तत्र यच्च इति पाठभेदः । प्र० कौ० प्रसादे ७१ पृष्ठे पूर्वार्धं उदाहृतः, तत्र च क्रियायाम्, विशेषणम् इति पाठभेदौ ।
४. पा० ८।१।१९॥
५. भाष्यानारूढमभियुक्तोक्तं वचनम्.

मन्त्र्य देवदत्त व्रजत्यसाविति देवदत्तामन्त्रणविशेषिता केवलाया विलक्षणा व्रजनक्रियेत्याख्यातं सविशेषणमेवेति वाक्यलक्षणसद्भावात्प्रवर्तत एव निघातः। देवदत्त व्रजानीत्येवमुदाहरणं न प्रदर्शितम्। आमन्त्रितं पूर्वमविद्यमानवद् इति न निघातः स्यादिति ॥५॥

पुनरप्यव्याप्तिं वार्तिककारलक्षणस्याशङ्क्य परिहर्तुमाह—

यथानेकमपि क्त्वान्तं तिङन्तस्य विशेषकम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषकम् ॥६॥[1]

इह पूर्वं स्नाति पचति ततो व्रजति तत इत्यत्र तत इत्येतस्मादुत्तरस्य व्रजतीत्यस्य निघातो न प्राप्नोति। वाक्यभेदात्। इष्यते च। अत्र तिङन्तादुत्तरस्य तिङन्तस्य अतिङ् इति प्रतिषेधान्निघातनिवृत्तिः सिद्धेति नात्र स्नातीत्यस्मादुत्तरस्य पचतिशब्दस्य निघातः प्राप्नोतीति चोद्यमुद्भावनीयम्। इष्टस्य निघातस्याप्राप्तिरेवात्रोद्भावनीया। अत्रोच्यते-नास्त्यत्र वाक्यभेदः। व्रजतीत्येतत्प्राधान्येनैकं क्रियापदमत्र स्थितम्। अन्यानि क्रियान्तराणि तद्विशेषणान्येव। यथा स्नानभोजनपानैः कृदन्तैर्विशिष्यते व्रजतिक्रिया। तथात्र तिङन्तैः स्नातिप्रभृतिभिः प्रधानं व्रजतिक्रियैव विशिष्यत इत्येकैवात्र सविशेषणा व्रजतिक्रिया, केवलायास्त्वस्याः पृथगेवेत्येतत्सविशेषणमेकमेव वाक्यमिति वाक्यभेदाभावान्नास्ति निघातासिद्धिदोषः। एकवाक्यत्वे च तिङन्तादुत्तरस्य तिङन्तस्य अतिङ् इति प्रतिषेधान्निघाताभावः। यथा[1] वक्ष्यति—

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।
तिङां तिङ्भ्यो निघातस्य पर्युदासस्तथार्थवान् ॥[6] इति॥

एवं चातिङ्ग्रहणे सप्रयोजने स्थिते वार्तिककारेण यदुक्तम्—अतिङ्ग्रहणमनर्थकं समानवाक्याधिकाराद् इति। तत्राभिप्रायो वाच्यः। एवंवादिनस्तस्य वाक्यभेदोऽत्राभिमत इत्यभिप्राय आख्यातं साव्ययकारकविशेषणमित्यत्रैकवचनस्य विवक्षितत्वादिति। तथा च टीकाकारः प्रदर्शयिष्यति—

एकतिङ्यस्य वाक्यं तु शास्त्रे नियतलक्षणम्।
तस्यातिङ्ग्रहणेनार्थो वाक्यभेदान्न विद्यते ॥[7] इति ॥

सूत्रकारस्य त्वतिङ्ग्रहणादेकमेवाखण्डं वाक्यमर्थैकत्वादाख्यातभेदेऽप्यभिप्रेतमिति गम्यते। तदभिप्रायानुसारेणैव निरूपयिष्यति—

१. पा० ८।१।७२॥
२. तिङन्तं तथाहु°—ग १. ३. ४. टीकाकोशाश्च। तिङन्तमथाहु°—ब.
३. प्र० कौ० प्रसादे ७१ पृष्ठे उद्धृतम्।
४. विशेष्यत—ब.
५. प्रतिषेधाभावान्°—छ १. २.
६. वा० प० २।४४६॥
७. पा० महा० भा० ८।१।२८॥ वा० १॥ तत्र अतिङ्वचनमनर्थकम् इति पाठः.
८. वा० प० २।४४७॥

अनेकाख्यातयोगेऽपि वाक्यं न्यायपथानुगैः।
एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम् ॥[1] इति ॥६॥

टीकाकारश्चामुमेव पक्षं सूत्रकाराभिप्रायसमाश्रयणेन युक्तियुक्तं मन्यमानो बहीरूप आन्तरो वा निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दः स्फोटलक्षण एव वाक्यमिति क्रमेण व्याजिहीर्षुश्चित्रज्ञानचित्ररूपदृष्टान्तप्रदर्शनं पूर्वमुपक्रमते। तत्र चित्रबुद्धिदृष्टान्तप्रदर्शनार्थमाह—

यथैक एव सर्वार्थः[2] प्रकाशः प्रविभज्यते।
दृश्यभेदानुकारेण वाक्यार्थानुगमस्तथा ॥७॥

चित्रज्ञानं सर्वाकारमेकमेव। प्रविभागस्त्वस्य दृश्यभेदसमाश्रयेण क्रियते नीलपीताद्यनेकाकारमेव विज्ञानमुपजातमिति। वस्तुस्थित्या तत्र ज्ञान आकारभेदो नास्ति। तथा वाक्यवाक्यार्थयोः स्वरूपं बोद्धव्यम्। वाक्यार्थानुगमस्तथा इत्यनेन हि वाक्यवाक्यार्थयोरखण्डत्वं पानकरसमयूराण्डरसचित्ररूपनरसिंहगवयचित्रज्ञानवत् समानमेवेत्युच्यते। यथा वाक्यं निर्विभागं स्फोटलक्षणं वाचकं तथा वाक्यार्थोऽपि तथाविध एवेत्यनयोरेकयोगक्षेमत्वमुक्तम् ॥ ७ ॥

एवमान्तरं दृष्टान्तमुपदर्श्य बाह्यमप्युपदर्शयितुमाह—

चित्रस्यैकस्य[6] रूपस्य यथा भेदनिदर्शनैः[7]।
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ॥८॥

चित्रं हि रूपमवयवविगतमनंशमेकमेव। तस्यैवावयवगतैर्यथा नीलादिभिः भेदेन निदर्शनं प्रदर्शनं येषां तैः पृथग्रूपैरेव समाख्यानं क्रियते ॥८॥

तथा प्रकृते किमित्याह—

तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः।
शब्दान्तरैः समाख्यानं साकाङ्क्षैरनुगम्यते ॥९॥

एकस्य निर्विभागस्य वाक्यस्य सर्वतः परिपूर्णस्य वाक्यान्तरगतैः पदान्तरैरन्वाख्यानं न तथैव क्रियत इति ॥९॥

न वा पदस्यार्थे प्रयोगाद् इत्यस्मिन्दर्शने यथाखण्डमेव पदं प्रकृतिप्रत्ययादिभिः कल्पितैरेव विभज्यते तथा वाक्येष्वसत्यभूतानामेवाबुधबोधनाय पदानां विभागो द्रष्टव्य इति प्रदर्शयितुमाह—

१. वा० प० २।३५१॥
२. सर्वार्थे—ग १. ४, ३. ज, छ.
३. प्रत्ययः—छ ३, ज.
४. °नुसारेण—ग २.
५. °धनिगम०—ग १. ३. ४। वाक्यस्ता
गतयस्°—ग २.
६. चित्रस्यैकस्य—क ७. ख.
७. °निदर्शनस्य—क ६. ख.ग.
८. पा० महा० भा० १।१।५६।।४॥ वा० १२॥

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः ।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते ॥१०॥

पदे हि यथा प्रकृतिप्रत्ययविभागोऽसत्य एव बालव्युत्पादनाय क्रियते तथा वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपवर्ण्यत इति बोद्धव्यम् ॥१०॥

तत्र वाक्यादपोद्धृतानां पदानां केवलमितरपदसारूप्यमात्रं दृश्यत इति प्रतिपादयितुमाह—

वर्णान्तरसरूपत्वं[2] वर्णभागेषु दृश्यते ।
पदान्तरसरूपाश्च पदे भागा इव स्थिताः ॥११॥

यथा सन्ध्यक्षरेषु भागा वर्णान्तरसरूपा दृश्यन्ते परमार्थतस्त्वव्यवपृक्तत्वान्निर्विभागा एव । एवं वाक्ये पदान्तरसरूपाः पदरूपा भागा पदभागाः । पदे वा निरंशे ये भागाः प्रकृतिप्रत्ययरूपास्तेऽवस्थिता इति ॥११॥

एतदेव व्यक्तीकुर्वन्नाह—

भागैरनर्थकैर्युक्ता वृषभोदकयावकाः ।
अन्वयव्यतिरेकौ तु व्यवहारे[7] निबन्धनम् ॥१२॥

न हि वृषभे ऋषभस्योदकयावकयोर्वोदयावशब्दयोरर्थानुगमः कश्चिदस्ति । अपि तु शास्त्रे पदस्य प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां विना कथमज्ञो व्युत्पाद्येत । एवं च निरंशमेव वाक्यं वाचकमित्येव युक्तम् ॥१२॥

शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति ।
विभागैः प्रक्रियाभेदमविद्वान्प्रतिपद्यते ॥१३॥

(विवरणम्)—यस्तावन्निमित्तरूपफलभेदादप्रसिद्धभेदक्रमवद्भिरयुगपद्भाविभिरवयवैर्युक्त इत्येवं प्रतीतश्शब्दः तस्यैवं नित्यत्वपक्षे योऽयं परिकल्पितो व्यवहारविषयो द्रव्यशक्तिनिमित्तानुपाती शब्देषु प्रत्यस्तरूपो विभागः स नास्ति । कुतो बुद्धिष्वलब्धयौगपद्यासु बुद्ध्यन्तरस्य बुद्ध्यन्तरे सततसन्निधानेनानुग्रहं कुर्वति व्यवहारं प्रत्येकबुद्धिप्रत्ययमूर्तरूपेषु मूर्त्तिभेदक्रमयुक्तेषु व्यर्थरूपेषु विभागरूपेणाविभागमापादितेषु आत्मान्तरत्वादनवयवायामनथाभ्युपगतभेदरूपबुद्धावुपसंसृष्टबुद्धिमात्रारूपनिर्भासेषु सत्यप्यात्मभेदे सर्वार्थेषु विभागो भविष्यति । तस्मात् समीहितसौवार्योऽर्थात्मा स्वरूपादप्रच्युतोऽपि सर्वो विभागानीतनत्त्व एव ।

१. उपपद्यते—ग १.३.४.
२. °सरूपं च—ख २.
३. पद—ख, ग १.३.४, टीकाकोशाश्च ।
४. व्यवस्थिताः—क ५ । अवस्थिताः—ख, टीकाकोशाश्च ।
५. टीकाकोशेषु कारिकायामपि अवस्थिता इत्येव पाठः ।
६. च—क ३.५, ख.
७. व्यवहार-इति सर्वेषु टीकाकोशेषु काशिसंस्करणे च.

विभागैः प्रक्रियाभेदम् इति । भेदग्रहणं हि तस्यार्थात्मनः शब्दात्मनश्चाभिन्नस्य प्रतिपत्तिद्वारम् । पदप्रतिपत्तिपूर्विका हि सामान्यविशेषावग्रहणोपाया लघुप्रक्रमा विभागेनाविभक्तस्य प्रतिपत्तिः, प्रकृतिप्रत्ययादिप्रतिपत्तिवत् । गुरुप्रक्रमा त्वत्र संसृष्टरूपस्य प्रतिपत्तिरविभागेन प्रतिपदं पाठवत् । कुशलस्तु प्रतिपत्ता सर्वमेव भेदमभेदानतिक्रमेण पश्यति । प्रक्रियाभेदास्तु शास्त्रे विभागनिबन्धनम् । तथा हि । हरिद्रुर्मितद्रुर्दुर्दर्शो दुस्तर इत्यत्र मितद्रुरवगृह्यो हरिद्रुरनवगृह्यः । तत्र विभागे प्रक्रिया भिद्यते । हरिद्रुः हरितरवः हरिद्रव इति । तथा दुस्तर इत्यपि तरतेस्तृणातेर्वा । अतश्च विभागे भिद्यमानायां प्रक्रियायामनवग्रहः । तथा इन्द्राणी वरुणानी पूतक्रतायी । इन्द्रादीनामानुक् पूतक्रतोरै चेति सामान्यविशेषवता लक्षणेन भेदेनान्वाख्याने शास्त्रप्रक्रियाभेदेनाविद्वांसः प्रतिपद्यन्ते ॥१३॥

टी०—अथ वाक्यार्थस्यापि तथैव निर्विभागत्वं प्रतिपादयितुमाह—शब्दस्य इति ।

शब्दस्य स्फोटलक्षणस्य विभागो नास्ति । तद्वाच्यस्य प्रतिभारूपस्यार्थस्य कुतो भविष्यति । यथा निदर्शयिष्यति—

विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते ।
वाक्यार्थ इति तामाहुः ॥

इति । तस्य पदानुरोधेन पदार्थस्यापि प्रकृतिप्रत्ययानुरोधेन भागकल्पना । मूढस्तु विभागेन प्रक्रियाभेदं प्रक्रियाभेदे चार्थभेदमसत्यमपि प्रतिपद्यत इति किं कुर्मः ॥१३॥

कथं पुनः श्रूयमाणरूपा एव देवदत्तादयः प्रतीयमानाभिधेया अनर्थका स्युः, इत्येतद्विचारयिष्यामः । अपि तु—

ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥[1]१४॥

यथा हि विच्छेदेनोच्चार्यमाणे ब्राह्मणकम्बल इति ब्राह्मणशब्द उपलभ्यमानस्वरूपोऽपि विच्छेदग्राहिभिः समाप्तिमनपेक्षमाणैः प्रतिपत्तृभिः प्रतीयमानार्थोऽप्यनर्थक एवेति प्रसिद्धः, एवं सत्यपि रूपविच्छेदग्रहणे सम्प्रत्यये चानर्थका एव वाक्यरूपापन्ना देवदत्तादिसरूपा अत्यन्तमसन्तः परिकल्पितात्मानो विभागाभिमताः ॥१४॥

युक्तं चैतद् यद्वाक्ये पदार्थभेदो नास्तीति दृष्टान्तप्रदर्शनपूर्वकमाह—[illegible] इति ।

यथा ब्राह्मणकम्बलशब्दे ब्राह्मणशब्दस्य न कश्चिदर्थो विद्यते तथैव देवदत्त [illegible] इत्यादौ वाक्ये देवदत्तादीनां पृथगर्थो नास्तीत्यनर्थकान्येव पदानि । [illegible] निराकाङ्क्षमेकं पदव्यतिरिक्तं वाक्यं पदार्थव्यतिरिक्तो वाक्यार्थश्च तथैवेति ॥१४॥

१. वा० प० २।१४४॥
२. हेलाराजेनापि जातिसमुद्देशे समासप्रत्ययविधौ इत्यादिश्लोकव्याख्यायां, वृत्तिसमुद्देशे शब्दान्तरेऽपि इत्यादिश्लोकव्याख्यायां च संगृहीतः । [illegible] उद्धृतः ।
३. [illegible]

देवदत्तादीनां च भागाभिमतानामर्थयोगाभ्युपगमे सामान्येऽवस्थितानां पदानां विशेषेऽवस्थानमित्येतस्मिन् सत्येकान्तेन परिगृह्यमाणे—

सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम् ॥१५॥[1]

इह सामान्यवृत्तिरुच्चारितो देवदत्तशब्दः सामान्यार्थसंबद्ध एव तिरोभवति। तत्र येन शब्देनाविर्भावकाल एव विशिष्टोऽर्थो न प्रतिलब्धः स शब्दः सामान्यार्थः तिरोभूतो विशेषेऽवस्थातुं न पुनरुत्सहते। न च सामान्यविशेषयोर्विवक्षा युगपत्संभवति। विशेषविवक्षायां हि सर्वस्यानियमेन सामान्यादवच्छेदो विज्ञायते। तत्रोपात्तस्य नित्ये शब्दार्थसम्बन्धे कुतस्त्यागः, युक्तिनिरूपणेषु चार्थात्मस्वभिधानक्रियायोगाभावे विनिवृत्तोऽनवधार्यमाणात्मा शब्दः शब्दोपक्रमस्यार्थस्याभावादविषयः क्वावस्थाप्यताम् ॥१५॥

यत्पुनर्मीमांसकैरुच्यते यथा—पदसंघात एवाकाङ्क्षायोग्यतासंनिधानवशात्परस्परसमन्वितो वाक्यं संसर्गश्च वाक्यार्थ[2] इति तद् दूषयितुमाह—सामान्यार्थः इति ।

इह देवदत्त गामभ्याज शुक्लां दण्डेन इति देवदत्तादीन्येव पदानि वाक्यम्। तत्र देवदत्तपदं तावद्यदि सामान्यमात्रे प्रथमं वर्तते तत्तस्य गवादिपदकाले वाचः क्रमवर्तित्वात्तिरोधानादसत्त्वमेवेति कुतः पदान्तरश्रवणकाले तदर्थप्रतीतिः। असत्त्वादेव च न पदान्तरसंनिधाने तस्य विशेषेऽवस्थानम्। अभ्युपगम्यापि स्मर्यमाणतया[3] पदान्तरसंनिधाने विद्यमानत्वं पदस्य न विशेषेऽवस्थानं युज्यत इत्याह—उपात्तस्य इति। सामान्यलक्षणस्य सकलपदार्थसाधारणस्यार्थस्य पूर्वमुपात्तस्य वाच्यत्वेन परिगृहीतस्येदानीं पदान्तरसंनिधाने त्यागः कुतो युज्यते शब्दार्थसम्बन्धस्यानित्यताप्राप्तेः। न च तथा मीमांसकस्याभ्युपगम इति। तदप्यभ्युपगम्योच्यते—निवृत्तः इति। स्वार्थान्निवृत्तोऽसौ पदान्तरसंनिधाने शब्दः क्वेदानीमवतिष्ठताम्। शब्दान्तरबोध्येऽर्थे तस्य वाचकभावविरहात्स्थितिः कथं युज्यते ॥१५॥

एवं तर्ह्यशब्दो वाक्यार्थः। शब्देष्वात्मरूपमात्रप्रतिपत्तिहेतुषु तिरोभूतेष्वपवेद्यसंस्कारविशेषायां बुद्धावुपजातायां, पदेषु पदार्थमात्रं प्रत्याय्य निवृत्तेष्वशब्दवाच्योऽसत्त्वभूतः सम्बन्धः संज्ञार्थानां सामान्यरूपाणां भेदहेतुरुपप्लवमानः शोकहर्षादिवदुत्तरेषु बुद्ध्यन्तरेष्वनुसन्धीयते। एतस्मिन्दर्शन उच्यते—

१. इदं हेलाराजेन जातिसमुद्देशे तयोस्तु पृथगर्थित्वेत्यादिश्लोकव्याख्यायां कालसमुद्देश आमिश्र एवेत्यादिश्लोकव्याख्यायां च संगृहीतम्।

२. इदमर्थद्वारेण मीमांसकमतप्रदर्शनम्.

३. स्मर्यमाण—ज

अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत् ।
एवं सति[1] च[2] सम्बन्धः शब्दस्यार्थेन[3] हीयते ॥१६॥[4]

कथं वर्णेष्वप्यनर्थकेषु स्वरूपमात्रं बुद्धौ संनिवेश्य निवृत्तेष्वभ्यासान्नियतनिमित्तमनाख्येयोपायमर्थरूपं बुद्ध्यन्तरेष्वनुसन्धीयते। तथा च शब्दार्थयोः सम्बन्धो हीयते। तथैव तु द्रव्यगुणकर्माणि विनिविष्टनिमित्तरूपाणि प्रयोजकैर्निमित्तैः सम्बद्धान्याख्यायन्ते। ज्ञानं च विनिविष्टज्ञेयरूपम्। अपरेण सम्बन्धकल्पेन ज्ञेयैरर्थैः सम्बन्ध इत्याख्यायते। ज्ञानाद्योपगृहीतबुद्धिरूपो बुद्ध्या सम्बन्ध उच्यते। तथा शब्दोऽप्यपरेण योग्यताख्येन सम्बन्धकल्पेनोपगृहीतार्थरूपो विनिवेशिताभिधेयतत्त्वः शब्दार्थयोर्भेदे तेन तेनार्थेन सम्बन्ध इत्युच्यते। अर्थभावपरिणतिपक्षे तु सर्वतो नेदीयान् संबन्ध इति ॥१६॥

अथोच्यते—अर्थप्रतिपत्तिर्दृष्टा देवदत्तेत्यादिकात्समुदायात् सा कथमपह्नूयते। तत्राह—अशब्दः इति ।

उक्तनीत्या[5] शब्दा न युज्यन्ते वाचकाः। तदभावाच्चाशब्दो वाक्यार्थो यद्यभ्युपगम्यते तदयमपरस्ते दोषः। पदार्थोऽपि पदप्रतिपाद्यो न कश्चित्। **अनेकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानाम्**[6] इति पदमप्येकं नास्ति। तदभावात्कः पदार्थः स्यात्। इत्थमशब्दोऽवाचको वाक्यार्थ इति वाच्यवाचकभावलक्षणः सम्बन्धः शब्दार्थयोस्त्यक्तः स्यान्मीमांसकेनेत्याह—**एवं च** इति ॥१६॥

विशेषशब्दाः केषांचित्सामान्यप्रतिरूपकाः ।
शब्दान्तराभिसम्बन्धाद् व्यज्यन्ते प्रतिपत्तृषु ॥१७॥

केषांचित्तु प्रक्रियान्तरवादिनामक्षादिवद्दृश्नोत्यादिक्रियायोगविशेषे विशेषान्तरयुक्ता देवदत्तादयो वाक्यविषया नित्यं परितः परिच्छिन्नार्थवृत्तयो विशेषशब्दवाचकस्य विशेषस्य प्रतिपत्तृभिः सामान्यापहृतबुद्धिभिः परोक्षविशेषैरपरिच्छेदात् सामान्यशब्दप्रतिरूपकाः। शब्दान्तराभिसम्बन्धादागन्तुना केन चिदप्यर्थेनायुज्यमाना नित्यसिद्धनियतत्वान्नियमं विशेषान्तराध्यारोपरूपं चातिक्रान्ताः केवलमनुवादमात्रेण शब्दान्तराणां यथायथमर्थाभिधानसिद्धये व्यज्यन्ते प्रतिपत्तृषु प्रयोक्तृभिर्निर्धारितविशेषा इत्यभिप्रायः ॥१७॥

एवं तावदभिहितान्वयवादी निरस्तः। इदानीमन्विताभिधानसमाश्रयणेन **पदमाद्यं पृथक्सर्वं पदं साकाङ्क्षम्**[7] इत्युद्दिष्टे वाक्यलक्षणे प्रदर्शयितुकाम आह—**विशेषशब्दाः** इति ।

१. च सति—क २. ५, ख, छ.

२. काशिसंस्करणे तु अर्थे न इति विभज्य पदद्वयं पठितम्। तद्विषयानवबोधमूलकं वा स्यात्प्रमादपूर्वकं वेत्यत्र सुधियः प्रमाणम्।

३. इदं स्याद्वादरत्नाकरे ४।१०॥ सूत्रे संगृहीतम्।

४. ०ह्रियते—छ १.

५. ०रीत्या—छ ४

६. पा० महा०भा० १।४।१०९।वा० १०। तत्र एकैकवर्णेत्यादिः पाठः,स एव च युक्तः।

७. वा० प० २।२॥

इह देवदत्त गामभ्याज इत्यत्र देवदत्तपदं गां बधान इत्यस्माद्विशिष्टमेव वक्त्रा समुदीरितम् । भ्रमात्तु सकलसाधारणं प्रतिभाति । उत्तरकालं गवादिपदसम्बन्धाद्विशिष्टा प्रतिपत्तिरभिव्यज्यत इति तदेव वाक्यम् । सकलविशेषणखचितश्च प्रथमतरमेवोपक्रान्तः संसृष्ट एवार्थो वाक्यार्थ इति । यथा वक्ष्यति—

पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्तथाशेष्वर्थवस्तुषु ।[2] इति ॥१७॥

निर्भागैकशब्दाभिधेयं त्वेकं वाक्यार्थं प्रतिपन्नाः स्वमतमुपपादयन्तो निदर्शयन्ति—

तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते ।
व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृषु ॥१८॥

तेषामेवमुपगृहीतसर्वविशेषे एकस्मिन्नर्थे बहुशब्दानभ्युपगच्छतामविकल्पः कृत्स्नो वाक्यार्थः प्रतिपदं प्रतिवर्णं वा समाप्यते । तदेतत्पक्षान्तरैः सह दर्शनं विचारयिष्यते । एवं व्यक्तेषु ह्युपव्यञ्जनेष्वर्थः प्रतिपत्तृषु प्रसिद्धिं लभते । न तु सन्निधानमात्राद् अनभिव्यक्तोपव्यञ्जन इति ॥१८॥

एतदेव स्फुटीकर्तुमाह—तेषां तु इति ।

उपक्रम एव विवक्षितार्थप्रत्यायनाय विशिष्टपदोदीरणमारभ्यते इत्याद्य एव पदे प्रत्येकं वा सकलस्य वाक्यार्थस्य समाप्तिरवगन्तव्या ।

यद्येकस्मादेव पदात्सकलवाक्यार्थप्रतीतिः, तर्हि इतरपदवैयर्थ्यमित्याशङ्क्याह—व्यक्तेति ।

प्रतिपत्तृषु वाक्यार्थस्य सिद्धिरवगतिर्व्यक्तोपव्यञ्जना । व्यक्ता उदीरिता उपव्यञ्जना अभिव्यञ्जकाः पदविशेषा यस्याः सा तथोक्ता । अभिव्यक्ताभिव्यञ्जका वाक्यार्थावगतिरिति पदान्तराणां वाक्ये नास्त्येव वैयर्थ्यमित्यन्विताभिधानप्रदर्शनम् । दूषणमस्याग्रे तत्र तत्राभिधास्यति । यथा—नियमार्था श्रुतिर्भेदे[3] इत्यादि । तथा हि । यद्येकेन पदेन सकलवाक्यार्थस्याशेषविशेषणैः खचितस्यावगतिस्तदोत्तरेषां पदानां नियमायानुवादाय वोच्चारणं स्यात् । न चैतद्युक्तमिति वक्ष्यामः । एकस्मादेव पदात्समस्तविशेषणखचितस्य वाक्यार्थस्य प्रतीतिरुत्तरेषामानर्थक्यं स्यादेव । न च तस्मादेव वाक्यार्थप्रतीतिर्दृश्यते ।

व्यक्तोपव्यञ्जना इत्यसमाधानमेव । यतः किमेकस्माद्वाक्यार्थावसायोऽन्येषामुपव्यञ्जकत्वम् । अथ समस्तेभ्य एव तेभ्यः । सर्वथोत्तराणि पदानि वाक्यार्थप्रतीतय उपदीयन्त एवेत्यन्विताभिधानमसमञ्जसमेव । एकस्य वापरपदोच्चारणकाले तिरोधानादभिहितान्वयस्याप्यसम्भव इत्यर्थभागे दूषणम् । शब्दभागसमाश्रयणेन द्वयोरपि पक्षयोर्दूषणं पदानि वाक्ये तान्येव[6] इत्यादिश्लोकद्वयेनाभिधास्यति ॥ १८ ॥

१. प्रतीति॰—क्र १.
२. वा॰ प॰ २ ॥४१॥
३. °भेदे—पु१.
४. °व्यञ्जका क २
५. अवयवविशेषा—क ५
६. वा॰ प॰ २।१४५॥
७. °विशेषण°—अ.
८. वा॰ प॰ २।२८॥

[illegible]व्यक्तो[1] क्रमवाञ्छब्द उपांशु यदधीयते[2] ।
एकरूपस्तु[3] [illegible] बुद्धि[illegible] तिष्ठते ॥१९॥

उपाधिमतो ह्येकस्य शब्दस्य विभागो [illegible] द्रुतमध्यमविलम्बितासु वृत्तिषु शनैरुपांशु परमोपांशु संहृतक्रमं चेति । तत्र प्राणवृत्त्यनुग्रहे सत्येव यत्र शब्दरूपं परैरसंवेद्यं भवति तदुपांशु । अन्तरेण तु प्राणवृत्त्यनुग्रहं यत्र केवलमेव बुद्धौ समाविष्टरूपो बुद्ध्युपादान एव शब्दात्मा तत् परमोपांशु । यत्र तु प्रतिसंहृतक्रमशक्तियोगया बुद्ध्या निमित्तान्तरोपसम्भासमव्यक्ते शब्देऽध्यारोपितं[6] हि शब्दानां क्रमरूपमिव साक्षात्क्रियते तत् प्रतिसंहृतक्रमम् । शब्दानां क्रमरूपोपसंहारविषयायां बुद्धावसम्प्रख्याततत्त्वामिव प्रतिपद्यमानायामारभ्यते शब्दातीतो व्यवहारः । संलुप्तशक्तयश्च क्रमसंहारेण समाविष्टवाचां प्रयोक्तॄणां शब्दा बुद्धौ प्रयत्नेन प्राणे करणेषु च क्रमवृत्तितामनुभूय प्रतिपत्तृष्वपि क्रमप्रत्यस्तमयेनैव समावेशं प्रतिपद्यन्ते । तत्रोपलब्ध्युपायानुपाती क्रमवृत्तिलक्षितो भेदो व्यावहारिकमपि शब्दतत्त्वं नानुपतति । क्रमसंहारानाश्रयणे हि व्यवहार एव विच्छिद्यते । तस्माच्च नभोगादिवत् प्राप्तदेशविभागैवैका यत्र बुद्धिः स एवाद्यन्तयोरेको वाक्याख्यः शब्द इति ॥१९॥

सम्प्रति प्रतिभाभेदव्याचिख्यासयाऽखण्डपक्षमेवानुबध्नन्नाह—स व्यक्त इति ।

इह निरंश एवाभिन्नो व्यक्तिस्फोटो जातिस्फोटो वा बहीरूप आन्तरः शब्दार्थमयो वा बुद्ध्यनुसंहारो वाक्यमिति स एव वाचक उपपन्नः । यस्तु भेदप्रतिभासः सोऽसावुपाधिकृत एवेत्यर्थः । तथोपांशु परमोपांशु व्यक्तो व्यक्ततरश्च विलम्बितो विलम्बिततरश्च द्रुतो द्रुततरश्चेत्यादिकाः प्रतिभासा अभिव्यञ्जकध्वनिकृता न पुनः सत्या इति बोद्धव्यम् । तस्माद्यः शब्दो व्यक्तं उपांशु कृत्वाधीयते सोऽभिव्यञ्जकध्वनिकृतात्क्रमात्क्रमवान्नानाविधावस्थायुक्तः प्रतीयते । परमार्थतस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः । उपाधिवशात्तु तत्र बुद्धिर्वितततेवानुगम्यत इति बोद्धव्यम् । अनेन एकोऽनवयवः शब्दः इत्युद्दिष्टस्य व्यक्तिस्फोटस्य स्वरूपमुक्तमिति बोद्धव्यम् ॥१९॥

एतस्मिंश्चैकत्वपक्षे निरवयवा शब्दव्यक्तिरेवैका स्यात् । या वा शब्दव्यक्तिः शब्दाकृतिरेव वाक्यमिति प्रतीयेत । तत्र निरवयवस्यैकस्यार्थस्य कुतो भेदसादृश्ये । भेदसिद्धिविशेषो ह्यात्मान्तरं सादृश्यं च । न ह्यात्माभेदः सादृश्यं वा । अपि तु विनापि सामान्यविशेषाभ्यां सामान्यविशेषान्तरवत्प्रसिद्धिः । तद्यथाऽप्रसिद्धरूपस्यापि निरवयवस्योत्क्षेपणत्वादेः ।

१. स व्यक्तः—ग. १. ३. ४.
२. उपांश्वयमधीयते—टीकाकोशाः ।
उपांशु समधीयते—ख.
उपांशुमभिधीयते—ग १. ३. ४.
वृत्तिकोशधृतस्तु पाठः परिगृहीतः ।
३. अर्थतस्तु—ग १. ३. ४.
४. विभक्ता—कोशः
५. रूपमुक्तोपादानं तमो—कोशः
६. शब्दाध्यारोपि—कोशः.
७. ऽव्यक्त—ङ्क १. ३. ४.

यथाक्षेपविशेषेपि कर्मभेदो[2] न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ॥२०॥
वर्णवाक्यपदेष्वेवं तुल्योपव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तत्त्वस्य सरूपेवैं प्रतीयते ॥२१॥

आक्षेपविशेषाद्धि स्वजातिप्रयुक्ते भिन्नात्मनि प्रतिभेदं विनिविष्टस्वजातिविशेषे भ्रमणादौ कर्मणि कम्पनरेचनोत्क्षेपणादिभ्यो यो भेदः स न गृह्यते। आवृत्तौ तु दिग्विशेषावधिसंयोगविभागोपाधिकायामुपलब्धायामनुपलब्धपूर्वाऽव्यक्तोपलब्धा वा भ्रमणरेचनाख्या जातिरुपलब्धॄणां स्वनिमित्तप्रत्ययहेतुः सम्पद्यते। तथैव यावत् सदृशानि जात्युपव्यञ्जनानि तावदत्यन्तभिन्नोप्यर्थः सर्व एव सारूप्येण गृह्यते ।

अपरः कल्पः । शब्दजातेरेव वाक्यत्वे भ्रमणत्वादयो दृष्टान्तत्वेनोपन्यस्ताः। वर्णत्वपदत्ववाक्यत्वानि हि तुल्यातुल्योपव्यञ्जनानि. यावत्तुल्योपव्यञ्जनसन्निपातस्तावद् बुद्धिभेदं कुर्वन्ति । कथम् । अपचितध्वनिव्यङ्ग्यस्तावदेको वर्णस्तस्याभिव्यक्तिनिमित्तैः सदृशैरन्यैश्च श्रुतिभिन्नैरेकं निरवयवं च पदं व्यज्यते। तथैव तुल्यातुल्यैः प्रचिततमैर्वाक्यमिति ॥२०।२१॥

अथ जातिः सङ्घातवर्तिनी[4] इत्युद्दिष्टस्य जातिस्फोटस्यापि दृष्टान्तप्रदर्शनद्वारेण स्फुटीकरणायाह—यथाक्षेपेति ।

इह भ्रमणलक्षणा कर्मजातिर्यथा विशिष्टप्रयत्नजनितेन क्षेपविशेषेणाभिव्यक्ता प्रत्येकंपरिसमाप्तत्वात् । न च पार्श्वस्थेन सा विज्ञायते । भ्रमणानामावृत्तौ तु भ्रमणं भ्रमणं प्रति प्रतिपत्त्रा सा गृह्यते । एवं वर्णपदवाक्येषु श्रुतिरभिव्यञ्जको ध्वनिरत्यन्तभेदे तत्त्वस्य वर्णपदवाक्यस्फोटलक्षणस्याभिव्यञ्जिका सरूपेव प्रतीयते । परमार्थतो भिन्नापि सती । कीदृशी । तुल्योपव्यञ्जना इति । तुल्यः सदृश उपव्यञ्जनः स्थानकरणाभिघातलक्षणो यस्याः सा तथेति । तेन भिन्नप्रयत्नोदीरितध्वन्यभिव्यक्तोयं जातिस्फोटो विलक्षण एवेति बोद्धव्यम् । युक्तं चैतत् ॥ २०—२१॥

व्यक्त्येकत्वपक्षे तु वाक्यस्यैकस्य पौर्वापर्यव्यवस्थां प्रत्युच्यते—

नित्येषु तु कुतः पूर्वं परं वा परमार्थतः ।
एकस्यैव तु सा शक्तिर्यदेवमवभासते ॥२२॥

कालाख्या हि कर्तृशक्तिः कार्येष्वेव प्रतिबन्धाभ्यनुज्ञाभ्यां पौर्वापर्यं प्रकल्पयति । न ह्यणूनामविशिष्टे सतां योगे पौर्वापर्यमस्तीति ।

ननु च नित्यत्वग्रहणे न तस्य पौर्वापर्यं स्यात् । एकस्मिंस्तु वाक्याख्ये निरवयवे एकग्रहणविषये वर्णपदविषयं पौर्वापर्यं न संभवतीति । अत इदमुच्यते—एकस्यैव तु सा शक्तिः इति । यदेवम् इति । क्रमप्रत्यवभासत्वमेकत्वानतिक्रमेण अक्रमे बुद्धिलक्षणे क्षणिकवादिनः सर्वस्य विरुद्धरूपमिवाविरुद्धं भवति । अत्यन्तविदां तु विश्वात्मन्येकत्वानतिक्रमेण क्रमप्रत्यवभासत्वं भवति । तथा शब्देपि स्यादिति नास्ति विरोधः । स्वशक्तियोगाद्धि प्रत्यवभासमात्रभेदान्नात्रोपायापायौ क्वचिदपि पक्षे विद्येते ॥२२॥

यथा निरंशस्यास्य स्फोटस्य पूर्वापरभाव उपाधिकृतो न स्वतो नित्यत्वादिति वैतत्येन नित्यत्वसमर्थनार्थमाह—नित्येषु इति ।

नित्येषु हि परमार्थतः पूर्वापरभावोऽसंभव्युपाधिकृतो दृश्यत एव । ननु सैदैकरूपतया किं नावभासते । न हि तत्र स्वभावभेदस्य सम्भव इत्याशङ्क्योक्तम्—एकस्य इत्यादि । एकस्वभावोपि तथाविधशक्तियुक्त एव वस्तुस्वाभाव्यात् । यदेवं वैतत्येन पूर्वापरभावस्वरूपतया उपाधिभेदानुवर्तनेनावभासत इति ॥२२॥

कथं पुनर्वाक्यपदह्रस्वदीर्घप्लुतव्यञ्जनादिषु नित्येष्वविशिष्टेषु कालभेद उपपद्यते—

चिरं क्षिप्रमिति ज्ञाने कालभेदादृते यथा ।
भिन्नकाले प्रकाशेते स धर्मो ह्रस्वदीर्घयोः ॥२३॥

तद्यथा चिरमिति ज्ञानस्य यदात्मकत्वं क्षिप्रमित्येतस्मिंश्च ज्ञानेऽपि । न च तयोरात्मनोः कश्चिदपि स्थितिकालभेदोऽस्ति । लब्धात्मकं हि सर्वज्ञानमविशिष्टकालं ज्ञानान्तरेण । अथ च चिरमित्येकं ज्ञानं ज्ञानान्तरेण अतिक्रान्तप्रत्यवमर्शरूपेण तद्भावनाविशेषावधानाच्च भाविनापि प्रत्यवमर्शरूपेण प्रकृष्टतामिव कालाध्वनः प्रदर्शयति । क्षिप्रमित्येतस्मिंस्तु लघुप्रवृत्तिरूपेण प्रत्यपकृष्यत इव कालाध्वा ॥२३॥

पुनरप्युपाधिभेदेनैव शब्दस्य भेदप्रतिभासो न स्वतो नित्यत्वादिति दृष्टान्तप्रदर्शनपूर्वकमाह—चिरम् इति ।

चिरमिति ज्ञानं क्षिप्रमिति च यथा ज्ञानत्वाविशेषादेककालमपि ज्ञेयसमाश्रयणेन भिन्नकालमिव प्रथते । चिरज्ञानं विततप्रतिभासमिवाभाति । क्षिप्रज्ञानमेतद्विपरीतम् । तद्वद्ध्रस्वदीर्घयोर्धर्मः स्वभावोऽवगन्तव्यः । न तु ह्रस्वादिरूपता काचित्स्फोट इति नास्ति स्फोटस्य स्वतो भेदः ॥२३॥

१. यथोत्क्षेप०—ग १. ३. ४.
२. °भेदेपि—क २.४.५.
३. स्वरूपे व—ग १.३.४.
४. [illegible]
५. [illegible]
६. [illegible]
७. युक्तं—°दिति इति सन्दर्भः छ५, ज इत्यतोऽन्यत्र कोशेषु यथाक्षेपेत्यादिश्लोकद्वयम् टीकायामन्तर्भावितः परं नैव [illegible] ।
८. [illegible]

१. पूर्वपर°—छ १.२.३.४.
२. ऽसंख्यायुपा—छ ५.
३. शानयक°—छ ५.
४. वर्णो—ग ३.४.
५. दीर्घह्रस्वयो:—क ५.७, ग १.३.४.
६. °मवभाति—ग.

कथं दीर्घप्लुतादिषु कालाध्वपरिमाणभेददर्शनमविरुद्धम् ।

न नित्यः परमात्राभिः कालो भेदमिहार्हति ।
व्यावर्तिनीनां मात्राणामभावे कीदृशः क्रमः ॥२४॥

नित्यपक्षेऽनित्यपक्षे वा कालस्य मात्राणां वाऽऽश्रीयमाणे न कालात्मनः सत्यतः कौचित् प्रकर्षापकर्षौ विद्येते । यदि नित्यः कालः, नास्य आदित्यगतिभिर्बह्वीभिरात्मपरिमाणमुत्कृष्यते नाप्यल्पाभिरपकृष्यते । क्रोशयोजनादिपरिमाणमिव भिद्यमानाभिर्गन्तृक्रियाभिः । कालस्यैव चोपाधिविशिष्टस्य परिमाणत्वात् कुतोऽस्यापरं परिमाणमित्येतत्कालसमुद्देशे व्याख्यास्यते ।

अथ गतिरपि नित्या सर्वमेवाव्यतिपाति त्र प्रतिज्ञायते । अथैता व्यावर्तिन्य एव विश्वस्य मात्राः, तत्र न पूर्वमपरेणानुसन्धीयते, सर्वं समीहितमसंसृष्टमेव व्यतिपतति, निरुपाख्ययोश्च पूर्वापरयोः कोट्योर्मध्यमनवबद्धं पश्चात्पुरस्ताच्चानालम्बनमनुपाख्यं पूर्वभागापरभागप्रत्यवमर्शिनेवाहङ्कारेणानुस्यूतमपकर्षपर्यन्तगतमभेद्यमभ्यसतः पररूपस्योपग्रहेण चात्यन्तमनुपग्राहि परिमाणाभेदेऽपि मिथ्याभ्यासादविदुषो दीर्घमिव प्रकाशते । तदेतस्मिन्पक्षे एकधर्मावबद्धेष्वेकधर्मप्रतिष्ठितेष्वभिन्नकालेषु सर्वव्यवहारेषु कीदृशः सतामत्यन्तासतां च मात्राभेदानां क्रमः । न हि शशविषाणस्योष्ट्रविषाणेन हिमवता वा कश्चिदपि क्रमो विद्यते । यद्यप्येकस्यार्थस्य संमुखीभावे सद्भिः समानकालैर्भिन्नकालैश्च व्यापारैः सह क्रमो न संभवति तथाप्येतस्मिन्दर्शने नान्यथा क्रमः संभवतीत्येवम्भूतैव क्रमव्यवस्था । सत्यमेवम्भूता क्रमव्यवस्था न तु कस्य चिन्मूर्त्तिपरिमाणभेदातिक्रमेण परिकल्पितपरिमाणभेदो विद्यते । सहोत्पादा हि सर्वे भावाः कालान्तरावस्थापरिकल्पिते कालाध्वनि मन्वन्तराख्ये क्षणाख्ये वा नात्मतत्त्वमतिक्रामन्तोऽनैकान्तिकेनागन्तुनाप्यनागन्तुकेन भेदेन संस्पृश्यन्ते । न हि तेभ्यो व्यतिरिक्तः क्षणाख्यः कालाध्वा मन्वन्तराख्यो वा कश्चिदन्यो विद्यते यस्मिन्नधिकरणभूते प्राप्तविशेषभावाः कालान्तरावस्थायिनो नित्याः क्षणिका इति वा प्रतिज्ञाभेदविषयतामापद्येरन् ॥२४॥

अथोच्यते—न नित्यमुपाधिवशाद्भिन्नं वक्तुं युक्तं स्वभावभेदप्रसङ्गादित्याशङ्क्याह—**न नित्यः** इति ।

इह कालोऽपि नित्य एवाभ्युपगतो **नित्यमेकम्** इत्यादिलक्षणकथनात् । तस्येदानीं क्षणलवनिमेषेत्यादिव्यवहारः कथमुपपद्यते । अथ परमात्राभिस्तस्य भेद उपचर्यते । यथा परमाणोः स्वावरुद्धनभोदेशत्यागोपलक्षितः कालः क्षणः, क्षणद्वयं च लव इत्यादि । तथा निरंशे वाक्य औपाधिकभेदपरिकल्पनायां कः प्रद्वेषः ।

१. क्रममा°—ग १.३.४.
२. कामद्भिरनेकत्वान्तेना—कोशः ।
३. वा० पा० ३ ।
४. तस्य भेदानां—ख ५.

अथ बूषे—न वयं नित्यमेकमित्यादिलक्षणलक्षिते काले व्यतिरिक्ते ... पूर्वापरीभूताः पदार्थमात्रा एव स्वभावभिन्नाः कालः । तत्समाश्रयणेन त्वयं क्रमयौगपद्यव्यवहारः, न पुनस्तद्व्यतिरिक्तनित्यस्वभावकालकृत इति । तत्राप्याह—व्यावर्तिनीनाम् इति । याः पूर्वापरीभूताः पदार्थमात्रा उदयव्यययोगिन्य एवेति विशराहणां तासां कीदृशः क्रमः, कथं च तत्समाश्रयणेन कालव्यवहार इति यत्किञ्चिदेतत् ॥ २४ ॥

एवं तर्हि क्रमवतीभ्यो मात्राभ्य उत्पन्ना बुद्धिः प्रचितमात्रा वाऽप्रचितमात्रा वा परिमाणभेदव्यवहाराय कल्पिष्यते सर्वथा साप्यनुपात्तमात्रारूपैव ।

ताभ्यो या जायते बुद्धिरेका सा भागवर्जिता ।
सा हि स्वशक्त्या भिन्नेव क्रमप्रत्यवमर्शिनी ॥२५॥

एकत्वाद्धि बुद्धावात्मभूतानि संसर्गिणीनां विरोधिनीनां वा मात्राणां भिन्नानि तत्त्वानि न संभवन्ति । सा त्वेका भागवर्जिता बुद्धिः प्रकाशस्वरूपत्वान्मात्राणां क्रमसंकीर्णपौर्वापर्याणां तद्रूपापरित्यागेनासंहार्यमपि संहृत्येव प्रत्यवमृशति । एवम्भूत एव बुद्धिप्रत्यवमर्शः ॥ २५ ॥

अथ तथाविधपदार्थसमाश्रयणेन बुद्धिरुपजायमाना कालव्यवहारं निर्वर्तयिष्यतीत्याशङ्क्याह—ताभ्य इति । ताभ्यः पदार्थमात्राभ्यो या जायते बुद्धिः सापि न शक्नोति कालव्यवहारं निर्वर्तयितुम् । यत एकासौ बुद्धिर्निर्विभागेति कथं पूर्वापरव्यवहारं निर्वर्तयेत् ।

तत्राह—सा हि इति ।

बुद्धिर्हि भिन्नेव स्वशक्त्या क्रमप्रत्यवमर्शिनी भविष्यति ।

क्रमोल्लेखानुषङ्गेण तस्यां यद्बीजमाहितम् ।
तत्त्वनानात्वयोस्तस्य निरुक्तिर्नावतिष्ठते ॥२६॥

इह यद् व्यवहितानां मात्राणामनुपाख्यानां पूर्वासु बुद्धिषु उपयुक्तसामर्थ्यानां सामापशिनी न रूपोपग्रहोल्लेख्या···(?) बीजानामिव व्यपदेशातीतं तत्त्वम् । कुतः । तत्र विरुद्धफलानां मात्रोपहितानामात्मशक्तिबीजानामेकस्यां बुद्धौ लौकिकमेकत्वं लौकिकं वा नानात्वं निर्वक्तुं न शक्यते । कथं हि विरुद्धात्मकमनवयवमेकं वस्तु स्यादनेको वा विरुद्ध आत्मा कथमेकस्य प्रकल्पकः ॥२६॥

यतः क्रमोल्लेखानुषङ्गेणैवासावनुभववासनावशादुपजायत इति कालव्यवहारनिर्वर्तनचतुरैव सा । एतद्दूषयितुमाह—**तस्याम्** इति ।

तस्यां बुद्धौ यदाहितं पदार्थमात्राभिरनुभववशाद्बीजं वासनारूपं संस्कारस्वभावं तत्किं व्यतिरिक्तं तस्या उताव्यतिरिक्तमिति द्वयी गतिः । व्यतिरेके तस्यास्तेन न किञ्चिदिति कथं तद्वशात्क्रमादिको

१. ऽसौ—ख, छ.
२. °वर्तिनी—का०. अपपाठः. टीकां चेद्बाधास्यत नेमं पाठमुपादास्यत ।
३. अत्राह—घ ३.४.
४. तत्तदा°—ख १.३.४.५.
५. तद्दर्शक°—ख ५.

व्यवहारः । अव्यतिरेके पुनरपि सैवेका निर्विभागेति पदार्थमात्रावत्कालव्यवहारं कथं निर्वाहयेदिति तत्त्वनानात्वाभ्यां निर्वचनं बुधैः कर्तुं न पार्यत इति यत्किञ्चिदेतत् ॥२६॥

भावनासमये[1] त्वेतत्क्रमसामर्थ्यमक्रमम् ।
व्यावृत्तभेदो[2] येनार्थो[3] भेदवानुपलभ्यते ॥२७॥

भेदभावनानुगतबुद्धीनामेकत्वेन व्यवहरतामनादिना मिथ्याभ्यासेन विहितसमवायानामेकस्यां बुद्धावव्यतिरिकास्वनपायोपायिनीषु सर्वमात्रासु क्रमाख्यायाः शक्तेः सामर्थ्यमविद्यमानं प्रकल्प्यते क्रमप्रसिद्धये । तदू व्यावृत्तभेदोपि सर्वा प्रा(?) शब्दाख्योऽर्थो विरुद्धधर्मक्रमरूपोपग्रहेणासतामपि भेदेन प्रयुक्त इवोपलभ्यते । तथा हि । ऊर्ध्वमधस्तिर्यगित्येकत्वेपि दिशो यथायथं विनिविष्टभावनाविशेषाः सर्वप्राणिनः । गुरुत्वादियुक्ता लोष्टादयोऽपि नात्मवत् (?) प्राणिनां भावनासमयमनुवर्तन्ते । एकं तु वाक्यं प्रतिपद्यमानस्यासदपि नित्यत्वादत्यन्तनानात्वं व्यवहारेण ॥२७॥

पुनश्चातकाण्डकलत्ववदविभक्त एव युक्त इति प्रतिपादयितुमाह—भावनेति ।

ब्रह्मकाण्डे सर्वशङ्कानिवारणपूर्वकं स्फोटस्वरूपं निरूपितमेव । तस्मादेतद्वाक्यमक्रमं स्फोटस्वभावमेकं वाचकम् । स्वपदार्थभावनावसरे तूपाधिवशात् क्रमसामर्थ्ये क्रमे सामर्थ्यं शक्तिर्यस्य तत् क्रमसामर्थ्यमवगतम् । येनार्थो वाच्यस्वरूपो व्यावृत्तभेदोऽखण्ड एव पदार्थोपाधिवशाद्भेदवानिवोपलभ्यते न परमार्थतः ॥२७॥

पदानि वाक्ये तान्येव वर्णास्ते च पदे यदि ।
वर्णेषु वर्णभागानां भेदः स्यात्परमाणुवत् ॥२८॥[4]
भागानामनुपश्लेषान्न वर्णो न पदं भवेत् ।
तेषामव्यपदेश्यत्वात्किमन्यदपदिश्यताम् ॥२९॥[5]

यदि वाक्ये तान्येव पदानि यानि पृथगुपलब्धानि वर्णाश्च ये पृथगुपलब्धास्त एव समुदिता यदि पदेष्वाश्रीयन्ते, न च वर्णेभ्यो वाक्यपदयोरात्मा व्यतिरिक्त इति प्रतिज्ञायते । तथा सति वर्णेष्वपि यावदपकर्षपर्यन्तगतिस्तावद्वर्णभागानां परमाणुकल्पो भेदः प्रसज्यते । तथा च क्रमवतामलब्धयौगपद्यानां भागानामन्योन्यासंस्पर्शान्न वर्णो नाम कश्चिदेकः पदं वा विद्यते । अव्यपदेश्यत्वाद्धि तेषु प्रतिभागं व्यवहाराभावात् किं तदेकमस्ति शब्दरूपं यदिदं तदित्युपाख्यायेत । एवं तर्हि नानिर्देश्यभागभेदरूपेण बहिरनुपसंहारेण शब्दतत्त्वेन व्यवहारोस्तीति ॥२९॥

1. भिसये—ग १.३.४, ङ.
2. व्यावृत्तिभेदो—ग ३. ४। व्यावर्तिभेदो—ग १.
3. येनार्थो—ङ.
4. इदं स्याद्वादरत्नाकरे ॥४।१४॥ सूत्रे संगृहीतं व्याख्यातं च यथा—
कि च प्रत्यभिज्ञानबलादेकत्वेन प्रतीयमानाः पदेषु त एव वर्णा वाक्येषु तेतान्येव पदानीति न वर्णेभ्यः कथं चिद्व्यतिरिक्तो वाक्यपदयोरात्मास्तीति यद्युपगमस्तदा वर्णानामपि पूर्वापरभेपपरादिभागभेदेन वास्तवो भेदः स्यात् ।
5. °दुपदिश्यताम् — ग १.३.४, ङ.
6. स्याद्वादरत्नाकरे ४।१०॥ इत्यत्र संगृहीतं व्याख्यातं च ।

यस्य पुनस्तानि पदान्येवोपलभ्यमानानि वस्तुसन्ति वाक्येऽभिमतानि, न तद्व्यतिरिक्तमेकमनंशमस्त्यखण्डस्वभावं वाक्यं, तस्य पदान्यपि न वर्णव्यतिरेकेण विद्यन्ते । वर्णा अपि भागवन्त इति प्रकर्षप्राप्तो[1] भेद एव सर्वत्र स्यादिति पदवादिनं दूषयितुमाह—**पदानि** इति ।

यथावयवव्यतिरेकेणावयविन एकस्यानङ्गीकरणेऽवयवानामपि भागवत्त्वाद्भागपरिकल्पनाया अतिप्रसङ्गात्परमाणूनामवशेषः । तेषामपि केषां चिन्मते षट्केन युगपद्योगात्सांशतायामणीयसोप्यवयवस्यानुपपत्तिः । अतश्च व्यपदेश्यपदार्थविरहितं निरीहमेव जगदापतितम् ॥२८॥

तथैव वर्णभागानामनुपश्लेषान्न वर्ण[2] एकः कश्चित्स्यात् । तदभावे पदमपि न भवेदिति प्रतिपादयितुमाह—**भागानाम्** इति ।

अतश्चोक्तरीत्या भागानामसत्त्वाद्व्यपदेशविरहात्किमत्र वाचकमेतद्व्यतिरिक्तमन्यदपदिश्यताम् । अखण्डस्यानङ्गीकरणात्पदानामुक्तेन न्यायेनानुपपत्तेरिति न कश्चिद्वाचकः स्यात् । अस्ति च वाक्यार्थस्य प्रतीतिः । सा सनिमित्ता भवितुमर्हतीत्येक एव नित्यः पदाभिव्यङ्ग्योऽखण्डो व्यक्तिस्फोटो जातिस्फोटो वा वाचकोऽङ्गीकार्य इति सिद्धान्तः ॥२९॥

यदन्तःशब्दतत्त्वं तु भागैरेकं प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता ॥३०॥

बाह्यस्याक्षरचिह्नादिवच्छब्दव्यपदेशमात्रायुक्तस्य यदुदयास्तमयनिबन्धनं वाचस्तत्त्वमक्षरचिह्नादिवदेवातथाभूतैः क्रमवद्भिर्भागैरक्रमं प्रकाश्यते तदेव मुख्यं शब्दस्यात्मरूपमित्यपरे मन्यन्ते । स चैष बुद्ध्यनुसंहारलक्षण आन्तरः शब्दात्मा तत्र समाम्नातः । तस्य चेत्थम्भावे विच्छिन्नपदरूपप्रविभागदर्शन एक एवायं वाक्याख्यः शब्दो यथैव वर्णपदाख्य इति प्रसिद्ध एव समाम्नाये मार्गः ॥३०॥

एवं तावद्बुद्धीरूपं व्यक्तिस्फोटं जातिस्फोटं वा वाचकमाश्रित्य वाक्यं व्याख्यातम् । इदानीमन्तरेवैानवयवं बोधस्वभावं शब्दार्थमयं निर्विभागं शब्दतत्त्वमिति यदुगीतं तदेव नादैर्वैदिः प्रकाशितं कृत्वाह—बुद्ध्यनुसंहार मन्तस्तत्त्वमेकं भागैः प्रकाशितमपरे शब्दमाहुः इति । तेनापि भागैरित्युपादानात्तस्योपादेयत्वं पुरातनत्वं च द्रढीयो भवति ।

1. °प्राप्तो—ज.
2. वर्णो°—छ ४.
3. पदाभिधेयो—छ १.२.३.४.
4. नादैरे°-का०, **टीकाकोशाः** तत्र वर्णपदादीनां भागानामभिप्रेतत्वाद् अनन्तरं च वक्ष्यमाणे श्लोके **अर्थभागैरि**ति प्रयोगसाम्यादयमेव पाठो ग्रन्थकारस्याप्यभीष्ट इति प्रतीमः । किं च । भरतमिश्रोपि **स्फोटसिद्धौ** स्फोटदर्शनभेदान् व्याचक्षाण इमामेव वाक्यपदीयकारिकां मनसि मूलकोशेषु वृत्तिकोशे च भागैः इत्येव पाठः ।
5. तमाहु°—ग १.३.४.
6. तथैकताम—**मूलकोशाः** ।
7. काशिसंस्करणे अन्तरे वा इति विभज्य पठितम् । तत्र परिष्कर्तुरभिप्रेतं दुरूहम् ।

वाक्यमाहुराचार्या इत्यन्तरं शुब्दतुसंहतिः इत्युद्दिश्य व्याख्यातुमाह—यदन्तः इति ।

वाक्यविचारे प्रस्तुते तस्यान्तरस्यैकता निरस्तैव प्रतिपाद्यत इति तदेव सत्यत्वाद्वाक्यमस्तु । किं तद्व्यतिरिक्तेनासत्येन वाक्येनेत्यर्थः ॥३०॥

अर्थभागैस्तथा तेषामान्तरोर्थः[2] प्रकाश्यते ।
एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ ॥३१॥

यथैवाव्यपदेश्यशब्दभागोपायमन्तर्निवेशिवाक्तत्त्वमभिन्नं मुख्यश्शब्दात्मेति प्रसिद्धं तथा व्यतिपातिनीषु व्यावहारिकीषु बाह्यास्वर्थमात्रास्वव्यपदेश्योपचीयमानविशेषं क्रमेण प्रत्यर्थं नियतमुत्पद्यमानं बुद्धितत्त्वं बाह्यवस्तुतत्त्वेनैव प्रत्युपभुज्यते । नित्यपक्षे वा क्रमशक्तिरूपनिर्भासमात्रया विवर्तते । न हि प्रतिलब्धार्थरूपविपर्यासां बुद्धिमन्तरेण बाह्यं वस्तु व्यावहारिकीष्वर्थक्रियासु समर्थं भवति । तस्मादन्तर्निविष्टरूपेणार्थेन सर्वो व्यवहारः क्रियते ।

अन्ये तु संक्रान्तविषयरूपाया बुद्धेरात्मनि समवायाद् बुद्धिरूपनिवेशेन तद्रूपतामिवापन्ने बोधात्मके पुरुषे पुरुषार्थस्य प्रसिद्धिं मन्यन्ते । प्रकाशस्वभावया बुद्ध्या चितिस्वरूपस्यार्थरूपस्य च प्रतिबिम्बकयोगेनोपग्रहे सम्भवति प्राप्तविषयरूपविपर्यासायामुपगृहीतपुरुषरूपायां बुद्धौ भोग्यभोक्तृशक्त्योरत्यन्तविभक्तयोरत्यन्तासंकीर्णयोरविभागप्राप्ताविव सत्यां विभागः प्रकल्पते । अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति । तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रया बुद्धिवृत्त्या विशिष्टज्ञानस्य प्रवृत्तिराख्यायते । सर्वेषु च पक्षेष्वन्तर्निवेशिन इव प्राप्तानुसंहारात् शब्दादन्तर्निविष्टरूपेष्विव प्रतिसंहृतेष्वविभक्तेषु विभागरूपानतिक्रमेणार्थेषु गृह्यमाणेष्वेक एवायं परिसमाप्तिप्राप्तानुसंहारो बुद्ध्यात्मा प्रतिपादकप्रतिपत्तव्यशक्त्योरविभागेन पृथगात्मनो भेदशक्तिरूपापरित्यागमात्रया व्यवतिष्ठते । नित्यवादिनां त्वनागन्तुकमनतिक्रान्तमनुपचयापचयम् ॥३१॥

न केवलं वाक्यं तथा यावद्वाक्यार्थोप्यखण्डः प्रतिभात्मकः पदार्थभागैरभिव्यज्यत इति प्रसङ्गादाह—अर्थभागैः इति ।

तेषामान्तरवाक्यवादिनामाचार्याणां मते आन्तर एवात्रापि वाक्यार्थ इति बोद्धव्यम् ।

तौ च शब्दार्थावभिन्नस्यैकस्यान्तरस्य तत्त्वस्य सम्बन्धिनौ वस्तुतः बहिः स्थितौ भेदाविव प्रतिभासेते इति बोद्धव्यम् इत्याह—एकस्यैव इति ।

प्रकाशकप्रकाश्यत्वं[3] कार्यकारणरूपता ।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ॥३२॥

१. वा० प० १।१॥
२. °रोऽर्थः—ग
३. °प्रकाश्ये—ग १. ती प्रकाशप्रकाश्यते ग ३. ४. ख ती इत्यपाठः ।

अयमन्तर्मात्रा शब्दोऽनपायिन्यपायिनीभ्यां द्वाभ्यां शब्दशक्तिभ्यामनुगतः । तस्यैतस्मिन्नात्मन्य विभक्तमपि प्रकाशकत्वेन प्रकाश्यत्वं विभक्तमिव प्रत्यवभासते । अन्योन्यानुविधायिरूपतया च कार्यकारणरूपता तस्यादेशस्यान्तर्मात्रेत्येवमाख्यायमानस्य शब्दात्मनः सर्वदा । सर्वदे ते नास्यान्यः कालाध्वा विद्यते । भावाभावविभागाभावप्रतिपत्त्यर्थं तु व्यवहारप्रदर्शनाय सर्वदेत्युच्यते । भावाभावविभागाभावादन्तर्मात्रानिवेशिशब्दार्थकत्वं, सर्वदैवानपायिनिर्भासोपगमोपि चास्याव्यतिरेकानतिक्रमेण तथैव व्यवस्थितः । सर्वव्यतिरेकानतिक्रमात् तत्र किंकृतं कदाचित् संप्रत्ययहेतुत्वम् । सर्वदा कदाचिदित्येतद्व्यतिरिक्तस्याधाराधेयभावविकल्पनावस्थितेरर्थस्य मिथ्याभ्यासभावनानुगमात् परिकल्पितभेदमात्मतत्त्वमेव तत्राविशेषो विशेष इव व्यामोहं जनयति ॥३२॥

ननु शब्दार्थौ वाच्यवाचकाविति प्रसिद्धम् । अतः कथं तयोरभेद इत्याशङ्क्याह—प्रकाशकेति ।

तस्य हि शब्दतत्त्वस्यान्तरस्य ज्योतीरूपस्य शक्तिभेदादयं भेदप्रतिभासो न विरुद्धः । एतच्चादावेवोक्तमागमकाण्डे एकस्य सर्वबीजस्य इत्यादिना ॥३२॥

अपि च—

तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते ।
अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने ॥३३॥

एकस्यात्मनो ह्यन्तर्मात्रानिवेशिनः शब्दार्थतत्त्वस्यात्मभूते नित्ये अनागमापगमे एकत्वमनतिक्रान्ते द्वे सामर्थ्ये भावाभावाख्ये एकबुद्धिगतमिव क्रमरूपमक्रमे संवेद्यते यथैव भावाभावावित्येका प्रख्या ।

(अत्र ग्रन्थपातः)

इदमपि तस्य शक्तिभेदादवभासत इति प्रसङ्गदाह—तस्यैव इति ।

तस्य तदेवैकं निर्विभागं परं तत्त्वमाश्रित्यायं सकललोकसंव्यवहारः शक्तिभेदात्प्रतीयते, किं पुनरयं वाच्यवाचकविभागमात्ररूप इत्यखण्डपक्ष एव युक्तः ॥३३॥

सम्प्रत्ययप्रमाणत्वे[6] पदार्थास्तित्वकल्पने ।
पदार्थाभ्युच्चये त्यागादानर्थक्यं प्रसज्यते ॥३४॥

इदानीं पदवादिमतमाशङ्क्य पुनरपि दूषयितुमाह—सम्प्रत्ययेति ।

यदि पदार्थसम्प्रत्ययः प्रमाणं पदपदार्थसत्तायामुच्यते । तदा देवदत्त गामभ्याज शुक्लां दण्डेन इत्यस्मिन्वाक्ये पूर्वपूर्वपदार्थानामुत्तरोत्तरपदार्थाभ्युच्चये स्वार्थत्यागात्तत्तत्पदोपादानस्यानर्थक्यं प्रसज्यते । ततश्चानर्थकस्योच्चारणवैफल्यादुच्चारिताद्वा तस्माच्छब्दमात्रात्पदार्थप्रत्ययस्यानुपपत्तेः किंनिबन्धना वाक्यार्थप्रतीतिः स्यादिति यत्किञ्चिदेतत् ॥३४॥

१. °वादावुक्त—ख २.३.४.५.
२. वा० प० १।४॥
३. °नास्तित्वे—क ३, ६. ७, ख ३.
४. क्रमनिर्भासे—क १.२.५.७.
५. °स्थापये—का०
६. प्रमाणत्वात्—ख१.२.५.७. ग, टीकाकोशः ।
७. पा० महा० भा० १।१।१॥२ वार्तिके.

तथा च पदानामव्यवस्थितेः पदवादोऽनुपपन्न एव लक्ष्यते इत्यभिधातुमाह—

राजशब्देन राजार्थो भिन्नरूपेण गम्यते[1] ।

राजा राजानं राज्ञा राज्ञे राज्ञो राज्ञि राजनीत्येवमनियतस्वरूपेण राजपदेन राजार्थप्रतीतिर्दृश्यते। यदि पदस्य सत्यता स्यात्तदा नियतं तत्परिदृश्येत। सर्वत्र न च दृश्यतेऽतो मन्यामहे मिथ्यैव पदानीति।

इतोपि नास्ति पदमित्याह—

वृत्तौ[2]वाख्यातसदृशं पदमन्यत्[3] प्रसज्यते[4] ॥३५॥

राजपुरुष इत्यस्यां वृत्तौ राजशब्द आख्यातसदृशः। ततश्च हे राजपुरुषेत्यत्र राज भ्राजस्व पुरुषेत्यर्थप्रतीतिः स्यात्। न चैतदिष्टम्। तस्मात्पारमार्थिकानि पदानि न सन्त्येव ॥३५॥

यदि च न केवलो राजशब्दोऽन्यत्र दृष्टप्रयोगः स राजपुरुषादिषु भिद्यते किंकृता पुरुषे राजपुरुषो ब्राह्मणपुरुष इति विशिष्टार्थस्यावगतिः—

यथाश्वकर्ण इत्युक्ते विनैवाश्वेन गम्यते।
कश्चिदेव विशिष्टोर्थः सर्वेषु प्रत्ययस्तथा ॥३६॥

तद्यथा अजकर्णोऽश्वकर्ण इत्युक्ते नाश्वार्थस्य कर्णार्थस्य वा स्वल्पोपि समन्वयो विद्यते। भेदविषयेण त्वत्यन्तमतदर्थेन वाक्येनार्थप्रदर्शिका क्रियते, बहुव्रीहितत्पुरुषसंज्ञादिभिः समुदायान्तरेषु शब्दसंस्कारः। अश्वादीनां पदार्थानामत्यन्तासमन्वयेपि गम्यते व्यावृत्तानुवृत्तस्वलक्षणः कश्चिदेव नियतोर्थः। तथैव सर्वासु वृत्तिषु अर्थान्तरासमन्वये गंस्यत एव विशिष्टोर्थः ॥३६॥

न केवलं केवलानां नियतरूपासंभवस्तेषां यावद् वृत्तावपि स्थितानामित्याह—**यथाश्वकर्ण** इति। अश्वकर्ण इत्यत्राश्वपदार्थेन विनैव जात्यन्तरविशिष्टः कश्चिदर्थो गम्यते। तस्मात्सर्वेष्वेव पदेषु परामृष्टविभागेषु वाक्याभिव्यञ्जकेषु सत्स्वखण्डवाक्यावगतिपूर्वको वाक्यार्थप्रत्यय इत्येव युक्तम् ॥३६॥

यदि तर्हि राजपुरुषादीनामश्वकर्णादिभिस्तुल्यः पूर्वपदोत्तरपदार्थसमन्वयः तत्कुतो रूढ्यरूढिविभागः।

वाक्ये[5] त्वर्थान्तरगतेः[6] सादृश्ये[7]परिकल्पने।
केषां चिद्रूढिशब्दत्वं शास्त्र एवानुगम्यते ॥३७॥

१. गृह्यते—ग ३.
२. वृत्तौ वाक्यार्थस°—ग ३.
३. °न्यत्र—का.
४. प्रयुज्यते—ग १. ३. ४, टीकाकोशाः। पुज्यते—का०. वृत्तौ भवेन केनापि पदेन सादृश्यात् पदान्तरस्याख्यातस्य प्रतीतिप्रसङ्ग इत्यर्थादस्माभिरङ्गीकृतः कोशगत एव पाठोऽनवद्यः।
५. वाक्येष्व—ग १. ३. ४.
६. अर्थान्तरगते—ग १. ३. ४, ङ.
७. सादृश्यं परिकल्प्यते—क १. ५. ७। सादृश्ये परिकल्पिते—ग १। सादृश्ये परिकल्पने—ग ३. ४.। द्वितीयतृतीययोः पाठयोरङ्गीकारेऽर्थासाङ्गत्यमिति नादृतौ।

इह स्वभावसिद्धे वृत्तिवाक्ययोरत्यन्तमर्थस्याभेदे वृत्या वाक्येन प्रक्रम्यमाणेऽस्य यत्र प्रधानस्याविशिष्टः क्रियादिसम्बन्धस्तत्र वाक्यस्य विच्छेदवृत्तिमात्रकृतभेदमिव सादृश्यं कल्प्यते, सत्स्वप्युपसर्जनविशेषणादिषु भेदेषु। अतश्च सादृश्यकल्पनया ते रूढिशब्दा इत्यवगम्यते। येषां तु वाक्यप्रक्रमोऽन्य एवार्थः क्रियासम्बन्धी वृत्तिप्रक्रमोऽन्य एव तेषां रूढिशब्दत्वम्। तेषु च शिल्पिनि ष्वाकुन्, संज्ञायां च, संज्ञायामनाचितादीनाम्, ङ्यापोः संज्ञाछन्दसोर्बहुलं, बहुलं तणि इत्येवमादीनि कार्याणि शास्त्र एवोपव्याख्यायन्ते ॥३७॥

ननु एवं सति योयं रूढ्यरूढिविभागः शब्दानामुच्यते स वृथेत्याशङ्क्याह—**वाक्ये** इति।

वृत्तिवाक्ययोः सादृश्यपरिकल्पने केषां चिच्छब्दानां वाक्ये विग्रहरूपेऽर्थान्तरप्रतीतेः रूढिशब्दत्वमुच्यते। यथा तैलपायिकेति[1]। अत्र तैलं पिबतीति वाक्यवेलायामर्थप्रादुर्भावः। वृत्त्यवस्थायां तैलपायिकेति जात्यन्तरयुक्तार्थस्य कस्य चित्प्रतीतिः। न च तस्य तैलपानक्रिया लभ्यत इति रूढिरूपतास्योच्यते। केषां चित्तु वृत्तिवाक्ययोरर्थस्य सादृश्यात् यौगिकत्वम्। यथा राजपुरुष इति। **परिकल्पने** इत्यनेन सर्वमेतदवयवविभागादिकं शास्त्रसमय एव कल्पनामात्रम्, परमार्थतस्तु व्यवहारकाले निर्विभागमेवोपलभ्यत इति प्रतिपाद्यते। एतदेव **शास्त्र एवानुगम्यते** इत्यनेन व्यक्तीकृतम् ॥३७॥

उपादायापि[2] ये हेयास्तानुपायान्प्रचक्षते।
उपायानां च नियमो नावश्यमवतिष्ठते ॥३८॥[3]

इह शब्दसंस्कारे कश्चिदर्थस्यापि समधिगममात्रायां बुद्धौ पदानि वाक्यस्योपकारायोपादीयन्ते। चर्चादिपदानि संहितायां वाक्यपदानि समासतद्धितसुब्धात्वेकशेषवृत्तिषु। तेषां च यदर्थमुपादानं तत्सन्निधाने नियत एषां त्यागः। उपायभावात्। शास्त्रे हि आमन्त्रितस्य पदात्परस्य तिङ्ङतिङ इति निघातादयः शब्दसंस्काराः। तथा एकादेश उदात्तेनोदात्तः, स्वरितो वा अनुदात्ते पदादौ, उदात्तस्वरितयोर्यण इति। तथा तत्पुरुषे तुल्यार्थतृतीया, सप्तमीहारिणौ इत्येवमादयोऽर्थप्रतिपत्तिमात्रा अपि दृश्यन्ते। यथा मे माता तथा मे पिता, सुस्नातं भोः, नमो भरन्त एमसि, सौभाग्यमस्यै दत्त्वा यथास्तं विपरेतनेति। तः परो यस्मात्सोयं तपरः, तादपि परस्तपर इति, वियातस्य भावो वैयात्यम् इति। तत एते पुरुषसंबोधनोपायाः। यदि त्वन्यथापि पुरुषाः प्रतिपादयितुं शक्यन्ते तदर्थान्युपायान्तराण्यपि प्रक्रम्यन्ते ॥३८॥

कथमेतदुच्यत इत्याह—**उपादायापि** इति।

शास्त्रमुपायः शब्दपरिज्ञाने। ज्ञातेषु तेषु प्रयोजनसम्पत्तेरनुपयोग इति तस्य परित्यागः।

उपायाश्च न नियता इत्याह—**उपायानां च** इति ॥३८॥

१. तैलपायिका कीटभेदः
२. उपादेया न—ग ३.
३. अयं सम्पूर्णश्लोको भरतमिश्रेण स्फोटसिद्धौ (अर्थपरिच्छेदे) संगृहीतः। तत्र उपादायापि हेयांस्तानुपायान्सम्प्रचक्षते इति पूर्वार्धः।

अर्थं कथंचित्पुरुषः कश्चित्सम्प्रतिपद्यते ।
संसृष्टा वा विभक्ता वा भेदा वाक्यनिबन्धनाः ॥३९॥

विचित्रा हि बहुधा प्रतिपत्तॄणां प्रतिपत्तिः । श्रोत्रियश्छन्दोऽधीते इति वाक्यार्थे पदवचनं, छन्दसो वा श्रोत्रभावः घंश्च प्रत्ययः,श्रोत्राभ्यां कृतं कर्मेति वा । तथा इको वक्तव्यः आखनिकः, इकवको वक्तव्यः आखनिकवकः । पात्रेसमितादिषु वा आखनिकवक इति पठ्यते । तथा उष्ट्रगोयुगाश्वषड्गवादिषु प्रत्ययत्वेनान्यथान्यथा चान्वाख्यानं क्रियते । ते यदि विभक्ताः कदाचिदप्यनिबद्धा वाक्ये । विद्यन्ते संसृष्टा राजपुरुषः प्लक्षन्यग्रोधौ विभक्ता राज्ञः पुरुषः, प्लक्षश्च न्यग्रोधश्चेति ।

अपर आह—संसृष्टा देवदत्त गामभ्याज शुक्लामिति । विभक्ताः, यत्र पदान्तरैः सह पदस्याप्रयोगः, सर्वथा यान्यविच्छिन्नरूपग्रहणानि निदर्शनाय सामान्यरूपावस्थितानि पदान्युपादीयन्ते तान्यप्यन्ततः सत्तायामुपनिबद्धानि न कस्यांचिदप्यवस्थायां निदर्शनायालम् । तस्माद्यदि संसृष्टा यदि विभक्ता नानिबद्धा वाक्ये भेदा विद्यन्ते । भेदसंसर्गौ त्वध्यारोपनियमानुवादैः पुरुषप्रतिपत्त्युपायावेवेति ॥३९॥

कश्चिदाचार्यः पाणिनिविरचितेन लक्षणशास्त्रेण शब्दानधिगच्छति । कश्चिदन्येनेति न नियमः । एतदेव स्पष्टीकृतम् अर्थं कथं चिद् इत्यादिना ।

तस्मात्संसृष्टस्य विभक्तस्य वार्थविशेषस्य वाक्यमेकमनंशमेव प्रतीतिनिबन्धनमिति पदपदार्थप्रविभागकल्पनमसमञ्जसमेवेति प्रतिपादयितुमाह—अर्थम् इति ॥३९॥

सोयमित्यभिसम्बन्धो बुद्ध्या प्रक्रम्यते यदा ।
वाक्यार्थस्य तदैकोपि वर्णः प्रत्यायकः क्वचित् ॥४०॥

नावश्यं विच्छिन्नपदरूपविग्रह एव शब्दः पौर्वापर्ययुक्तमनुगतविभागमेवार्थं प्रत्याययति । यदा हि वाक्यार्थस्यैवेग्यणः स्थाने भवतीत्येवमादेर्बुद्धिविषयः सम्प्रसारणमिति वा, स भि इति वा सोयमित्यभिसम्बन्धः क्रियते, अथो यथैवेग्यण इत्यनेन पौर्वापर्यानुपातिनी प्रतिपत्तिर्भवति । एवमपौर्वापर्यया भभि इत्येकवर्णया तस्यार्थस्य संज्ञया प्रत्यस्तमितपौर्वापर्यः स एवार्थात्मा प्रतीयते । न चावश्यं शब्दव्यवहितैव तत्र प्रतिपत्तिर्भवति । कृताभ्यासानां हि शब्दान्तरेणार्थप्रतिपत्तिर्न व्यवधीयते । यदि च लघूपायं सामान्यविशेषयुक्तं शास्त्रं सहशसंव्यवहारमलस(?)इतीव मिथ्याभ्यासविपर्ययः तद्दर्शिनो लोके नानुपतेत्तदा प्रतिपत्तारस्तमेवाक्रमं प्रतिपद्येरन् । भेदरूपेण चैकत्वं संकीर्णम् । तेन सापराधेव प्रकर्षविनिवेशिन्याः प्रक्रान्तक्रमरूपोपप्लवाया वाचो वृत्तिः । सा हि सापराधेषु पुरुषेष्वन्यथैवात्मानं दर्शयति । अतश्च तामेके पश्यन्तोपि न पश्यन्ति शृण्वन्तोपि न शृण्वन्ति । तां तु वैयाकरणा वाग्योगविदः शब्दात्मानमभिसंभूता भेददर्शनमतीत्य स्वेन स्वरूपतस्त्वेनोपलभन्ते ।

१. वाग्—क १ । वाचि क ५.   २. भक्ता—क ६.

सा च तेभ्य एवात्मानं विवृणोति । उक्तमिदम्—अर्थं कथंचित् पुरुषः कश्चित्सम्प्रतिपद्यते इति । अतः पुरुषप्रतिपत्तिभेदानां परिमाणविकल्पानां निदर्शनमात्रं क्रियते ॥४०॥

अतश्च निरंश एवायं पदार्थशून्यो वाक्यार्थोऽध्यासमात्रसम्बन्धगर्भ एकस्मादपि वर्णात्प्रतीयत एवेत्यभिधातुमाह—सोयम् इति ।

सोयमित्यभिसम्बन्धोऽध्यासरूपो वाक्यार्थस्य वाक्येन सह यदा वक्त्रा प्रक्रम्यते तदैकोपि वर्णो वाक्यार्थस्य वाचको भवत्येव । किं पुनरनेकमशेषविशेषाभिधानविवक्षयोदीरितं पदमिति । एवमध्यासवशाद्वाक्यवाक्यार्थयोरभिन्नस्वरूपत्वाद्वाक्यार्थाभिव्यक्तौ वाक्यमपि स्फोटात्मकमभिव्यक्तमेवेत्युक्तं वाक्यार्थस्य तथैकोपि इत्यादि ॥४०॥

केवलेन पदेनार्थो यावानेवाभिधीयते ।
वाक्यस्थं तावतोर्थस्य तदाहुरभिधायकम् ॥४१॥

इह यावन्तं केवलो वृक्षशब्दो जातिमात्रं भिन्नमर्थं ब्रवीति तावन्तमेव वृक्षोस्ति वृक्षो नास्ति वृक्षश्छिन्न इत्येवमादिष्वपि वाक्येषु प्रातयोगं प्रत्याययति । भावाभावच्छेदादियोगो भिन्नजातियुक्तात्मकतां प्रदर्शयति । नापि जातियोग्यो भावाभावच्छेदादिसम्बन्धः । न हि मात्रान्तरनिबन्धनस्य मात्रान्तरप्रत्यायने सामर्थ्यमस्ति ॥४१॥

सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते ।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ॥४२॥

यत्तु पदान्तरेण सम्बन्धे वीरः पुरुष इति विशेषणविशेष्यत्वात् सामानाधिकरण्यं जातिगुणविशेषयोरेकार्थसमवायप्रतिपत्तिपूर्वकमर्थेष्वाधिक्यं दृश्यते वाक्यार्थ एवासौ । न हि तस्यान्तःपदं शब्दसंस्कारे निमित्तत्वेन व्यापार आश्रीयते । यस्त्वेकपदविषयो व्यतिरेकः कर्मादिवद्बाह्यनिमित्तोपजनितो राज्ञः पुरुष इति सोन्तःपदं प्रातिपदिकान्येव विभक्तियोगविशेषयोगे नियमयति । स चायं वाक्यपदयोराधिक्ययोर्भेदो भाष्य एवोपव्याख्यातः । अतश्च तत्रभवानाह—यथैकपदगतः प्रतिपदे[illegible]ऽन्तःपदं संस्कारहेतुरर्थो वचनं प्रति...... भवति तथैकपदगतः पदसंस्कारहेतुरेव विभक्तिरे[illegible] हेतुर्भवति । ग्रामो ग्रामो रमणीय इति । अनेकपदसंश्रयस्तु वाक्यार्थः [illegible] हेतुराख्यायेत इति ॥४२॥

इदानीमभिहितान्वयपक्षसमाश्रयणेन सङ्घातपक्षस्य प्रदर्शनायाह—केवलेन इति ।

केवलं पदं यस्यैवार्थस्य वाचकं वाक्यस्थमपि तदेवाभिदधाति [illegible]

१. °एवावगम्यते—ग १. ३. ४.   ३. तथा°—[illegible]
२. वाक्यार्थान्तरवतो—ग १ ।   ४. [illegible]
वाक्यार्थान्तरवर्ते—ग ३ । वाक्यार्थता'''   ५. [illegible]
ग ४. एषां साधुरूपमुन्नेतुं दुःशकम् ।

परस्परान्वये पदार्थवशाद्यदाधिक्यं संसर्गः स वाक्यार्थः। उक्तं च । यदत्राधिक्यं वाक्यार्थः सः इति। अनेकपदसंश्रयम् इत्यनेन सङ्घातो वाक्यमिति दर्शितम् ॥४१।४२॥

अथाप्यनेकपदसंश्रयत्वेऽपि अपरो दर्शनभेदः—

स त्वनेकपदस्थोऽपि प्रतिभेदं समाप्यते ।
जातिवत्समुदायेऽपि संख्यावत् कल्प्यते परैः ॥४३॥

तद्यथा जातिवत्सत्तावानेकाधिकरणयोगेऽपि प्रत्यधिकरणमन्यूनकार्या, तथायमेकेषां वाक्यार्थं आवृत्तिन्यूनतासमातिक्रमेण प्रतिपदमेवाविकलः समाप्यते। अथापरः कल्पः—यथैकस्या विंशत्यादिकायाः संख्यायाः प्रत्यधिकरणं तन्निमित्त-प्रत्ययहेतुत्वं तथा वाक्यार्थस्य प्रतिपदं प्रत्याय्यत्वेनावस्थानमिति ॥४३॥

वाक्यार्थस्य चास्य जातिवत्प्रत्येकपरिसमाप्तिः, केषांचिन्मते संख्यावत्समुदायपरिसमाप्तिरिति पक्षद्वयं दर्शयितुमाह—स त्वनेकेति ।

सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः ।
तदर्थान्तरसंसर्गाद्भजते भेदरूपताम् ॥४४॥
भेदानाकाङ्क्षतस्तस्य या परिप्लवमानता ।
अवच्छिनत्ति सम्बन्धस्तां विशेषे निवेशयन्[3] ॥४५॥

अपरे तु मन्यन्ते—स्वार्थमात्रोपादायिनः सर्वभेदान्प्रति या योग्यता तदेवानुगुण्यमात्रं सामानाधिकरण्यमात्रम्। न हि तथान्यथा सर्वथा चेति सामान्यावस्थारूपं किञ्चिदस्ति। सर्वे एते विशेषा एव । तस्यां तु सामान्यावस्थायां भेदस्य कस्यचिदनिरूपणादानुगुण्याच्च या सर्वभेदोपग्रहयोग्यता परिप्लवमानकल्पनार्थस्य तां सम्बन्धो विषयान्तरादवच्छिद्य विशिष्टे विषये नियमयति। तस्मिंश्च योग्यतावच्छेदमात्रेऽर्थस्य क्रियमाणे नाध्यारोपनियमो, नानुपादानयोग्यता किञ्चिदर्थरूपं नाप्यर्थरूपादन्या ॥४४।४५॥

अथात्र सङ्घातपक्ष एव प्रकारान्तरेणान्विताभिधानप्रदर्शनात्पदार्थ एव वाक्यार्थ इति प्रकाशयितुमाह—सर्वभेदेति ।

सर्वेषां भेदानामानुगुण्यं यस्मिन् तत्तथाविधं सामान्यं संसर्गलक्षणमाकाङ्क्षायोग्यतासन्निधानवशेन पदान्तरसंसर्गान्नियतस्वरूपं वाक्यार्थः ॥४४॥

तत्र चाकाङ्क्षावसरे येयमस्फुटरूपता वाक्यार्थस्य तामितरपदार्थसन्निधिर्निवारयतीत्याह—भेदान् इति ।

पूर्वत्र पदानां वाक्ये तावानेवार्थो यावानेव केवलानां संसर्गस्तु सङ्घातवाच्यः। इह तु तथाभूत एव सामान्यरूपः पदस्यार्थः, यस्तत्तद्विशेषसन्निधौ तत्तद्विशेषविश्रान्त इति ॥४५॥

१. पा० महा० भा० २।३।४६॥ २ वार्तिके।
२. न धृतम्—छ ४.
३. निवेशयेत् इति सर्वत्र मूलकोशेषु वृत्तिकोशे छ १ इत्यत्र च. टीकागतस्य पाठस्य साधीयस्त्वात्स एव मूले धृतः।
४. दन्याभ्राद्य—वृत्तिकोशः.

यस्तर्हि योग्यतावच्छेदहेतुः सम्बन्धः, स च नार्थेभ्यो वाक्यस्याभिधेय इति प्राप्तं सोऽपि सर्वाभिधेयधर्मानतिक्रान्तः सम्बन्धः। यदि सर्वाभिधेयधर्मानतिक्रान्तः कथं तर्हि सोऽस्तीत्यवसीयते—

कार्यानुमेयः सम्बन्धो रूपं तस्य न दृश्यते[1] ।
असत्त्वभूतमत्यन्तमतस्तं[2][3] प्रतिजानते ॥४६॥

न हि तस्य सम्बन्धस्य स्वरूपमवधारयितुं शक्यम्। स एव योग्यतावच्छेदकार्यप्रसवानुमेय एव नित्यं प्राप्तसंविज्ञानपदविशेषनिबन्धनः साक्षात्सम्बन्धेऽसंबन्धे वा सर्वप्रत्ययात्मसु विशिष्टस्वरूपः। अतश्चेदन्तदिति साक्षात्पर्यायशब्देन वा व्यपदेष्टुमशक्यत्वादत्यन्तासत्त्वभूतमनेकसम्बन्धिविषयं संबन्धमाचक्षते ॥४६॥

सङ्घातपक्षे संसर्गो वाक्यार्थ इत्युक्तम्। स च पूर्वत्र जातिवत् संख्यावद्वा पदार्थव्यतिरेकेण वाक्यार्थत्वेन कल्पितः। इदानीं पदार्थव्यतिरेकेणासन्नेवैकान्तानुमेयो न समुदायवाच्यः, किं तर्हि सर्वभेदानुगुणसामान्यरूपो विशेषान्तरसन्निधानाद्विशेषविश्रान्तः पदार्थ एव वाक्यार्थ इति दर्शयितुमाह—कार्यानुमेय इति ।

कार्येण पदार्थानां विशेषविश्रान्तिलक्षणेनानुमीयत इति कार्यानुमेयः। इदं तदिति तु रूपं तस्य न दृश्यते। अत एवासत्त्वभूतं पदार्थव्यतिरेकेण सत्त्वं नास्ति यस्य तमेवंभूतमाचार्याः प्रतिजानते ॥४६॥

नियतं साधने साध्यं क्रिया नियतसाधना ।
स सन्निधानमात्रेण नियमः सन् प्रकाशते[4] ॥४७॥

नियतसाधनः साध्योऽर्थः। नियतक्रियाणि च साधनान्यविभक्तरूपोपकाराण्यपि युतव्यवस्थानि प्रतिपदमभिधेयत्वेनावस्थितानि। नित्यनियतत्वाच्च नियमोऽप्यत्र विधेयः। संस्तु नियमः प्रयोगे सन्निधिमात्रेण पदान्तराणां पुरुषं प्रति प्रकाशते नानुगृह्यते ॥४७॥

एतदेव व्यक्तीकर्तुमाह—नियतम् इति।

साध्यं साधनं च परस्परं नियतमेव। केवलमाकाङ्क्षावशादितरपदार्थसन्निधाने सति नियमः सन्नेव प्रकाशत इत्याक्षिप्तपदान्तराणि पदान्येव वाक्यं, पदार्थश्च वाक्यार्थ इत्यव्यतिरिक्तः सङ्घातपक्षोऽयम् ॥४७॥

यदि तर्हि नियतसंसर्ग एव नित्याविभक्तोऽयमर्थ एवं सति किंकृता गुणप्रधानभावप्रत्यवस्था—

गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।
साध्यत्वेन[5] निमित्तानि[6] क्रियापदमपेक्षते ॥४८॥

१. विद्यते—ग १. ३. ४.
२. असत्यभू°—ग १. ३. ४.
३. °स्तत्—ग १. ३. ४.
४. सम्प्रकाशते इति मूलकोशेषु नियमेन। वृत्तिकोशानुसारी पाठ एव युक्त इति स एवास्माभिराहृतः।
५. साम्यत्वेन—ख.
६. निमित्तादि—ग १. ३. ४.

इह साध्येनानुपकारकेणाङ्गिना मुख्येनार्थेन प्रयुक्तानि सर्वतः सिद्धानि परार्थान्युपकारं प्रति शेषभावेनौत्सुक्यवन्तीवाङ्गानि उपादीयन्ते। साध्यत्वेनैव तु निमित्तानि क्रियापदं नपेक्षते। एतदुक्तं भवति। अर्थेषु सतीमसतीं वा शब्दवृत्त्यनुकारेण पुरुषो व्यपेक्षां समीहते। तां शब्द एव प्रकाशयति। सा हि नित्यनिविष्टरूपेव शब्दात्मनि ॥४८॥

अथात्र परस्परापेक्षायां समानायां विशेषमभिधातुमाह—गुणभावेन इति।

नाम कारकपदं क्रियायां गुणभूतं सत् पदान्तरमाकाङ्क्षति। क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षते इति ॥४८॥

अपर आह —

सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः[1]।
ते क्रमादनुगम्यन्ते[2] न वाक्यमभिधायकम् ॥४९॥

अर्थत्वमापद्यमानेषु यावन्तो विशेषाः सन्निहिता नियतप्रसिद्धिव्यवस्थास्ते शब्दान्तरविषयेण कालवृत्त्यनुग्रहेण प्रतिबन्धाभ्यनुज्ञाख्येन प्रतिपत्तृभिरनुगम्यन्ते, नापरं वाक्यं नाम किञ्चिच्छब्दरूपमभिधायकं विद्यते ॥४९॥

क्रमो वाक्यमित्युद्दिष्टम्। क्रमपक्षं व्याख्यातुमाह—सन्त इति।

पादार्थेषु देवदत्तादिपदवाच्येषु गोकर्मिकायामभ्याजिक्रियायां[3] देवदत्तपदार्थस्य कर्तृत्वं गोपदार्थस्य देवदत्तकर्तृकायां कर्मत्वमित्यादयो विशेषाः सन्त एव पदेभ्यः क्रमेण प्रतीतेभ्योऽवगम्यन्त इति क्रम एव वाक्यम्। न वाक्यमभिधायकम् इत्यनेन क्रमव्यतिरेकेण शब्दात्मकं न वाक्यमभिधायकमस्तीत्युच्यते ॥४९॥

शब्दानां क्रममात्रे च नान्यः[4] शब्दोस्ति वाचकः।
क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ॥५०॥[5]

न हि पदेषु प्रतिबन्धाभ्यनुज्ञाभ्यां कालेनानुगृह्यमाणेष्वपरः शब्दः कश्चिदुपजायते येनार्थान्तरं प्रत्याय्येत। क्रमो हि शब्देषु कालशक्तिरूपविशेषस्य निवेश इव। स कालात्मनो न व्यतिरिच्यते। तेन वाक्यमित्यवस्तुकमेवेदमभिलापमात्रं पदमेवार्थवदिति ॥५०॥

एतदेव स्फुटीकुर्वन्नाह—शब्दानाम् इति।

अनपेक्षितविशिष्टानुपूर्वीकः क्रमः क्रममात्रम्। तस्मिन्सत्यर्थप्रतीतेर्नान्यस्तद्व्यतिरिक्तः कश्चित्स्फोटादिः शब्दो वाचकोभ्युपगन्तुं युक्तः। अपि तु क्रम एवोपलभ्यमानो वाचकः।

अथ क्रम इति किमुच्यते इत्याह—क्रमो हि इति।

१. अव्यवस्थिताः—क १. अयं चापपाठः। छन्दोभङ्गात्।
२. °नुमन्यन्ते—ग ३.
३. °मभ्याज—का०.
४. नान्य—क १. २. ५. ७, ग १. ३. ४.
५. इदं स्याद्वादरत्नाकरे ४।१०॥ सूत्रव्याख्याने संगृहीतं मीमांसकमतनिराकरणे च विनियुक्तं न त्विहेव तदुपपादने। तत्र शब्दो न विद्यते इति पाठभेदः।

क्रमवत्पदपदार्थोपाश्रितविशेषेणापि कालस्य स धर्म उच्यते ॥५०॥

किमर्थं तर्हि क्रमवतां कालशक्तिरूपनिवेशानुग्रहाद्वर्णानामेवार्थवत्ता नाभ्युपगम्यत इत्याह—

ये च संभविनो भेदाः पदार्थेष्वविभाविताः[1]।
ते सन्निधाने व्यज्यन्ते न तु वर्णेष्वयं क्रमः ॥५१॥
यथा ह्युच्चरिते पदे संभविनां भेदानां
(अत्र ग्रन्थपातः)

युक्तं चैतत् यत्क्रम एव वाक्यमित्याह—ये च इति।

पदार्थेषु ये भेदाः पूर्वोक्ताः सन्ति ते केवलेष्वविभाविताः सन्तः क्रमवत्पदार्थान्तरसन्निधानेभिव्यज्यन्त इति दर्शनात्क्रम एव वाक्यमिति पदक्रमो वाक्यमुक्तम्। वर्णक्रमस्तु न तथेत्युक्तं न तु वर्णेष्वयं क्रमः इति ॥५१॥

एतदेवोपसंहारेण स्फुटयितुमाह—

वर्णानां च पदानां च क्रममात्रनिवेशिनी[3]।
पदाख्या वाक्यसंज्ञा च

वर्णक्रमः पदमुच्यतां नाम। वाक्यसंज्ञा पदक्रम एव युक्ता तथार्थप्रतीतिदर्शनात्।

क्रम एव शब्दो न वर्णपदे इत्युक्तमुपसंहर्तुमाह—

शब्दत्वं नेष्यते तयोः ॥५२॥

तयोर्वर्णपदयोः शब्दत्वं श्रोत्रेन्द्रियग्राह्यत्वेपि वाचकत्वलक्षणं नेष्यते। अपि तु क्रमस्यैव ॥५२॥

पदक्रमस्य शब्दत्वं वाक्यार्थेनार्थवत्तायाम्। वाक्यार्थभागैस्तु पदानामर्थवत्त्वम्। एवं वर्णक्रमस्यापि शब्दत्वं पदार्थेनार्थवतः, तदर्थवतां वर्णानां किं नाङ्गीक्रियत इत्याह—

समानेपि[4] तु[5] शब्दत्वे दृष्टः संप्रत्ययः पदात्।
प्रतिवर्णं त्वसौ नास्ति पदस्यार्थमतो विदुः ॥५३॥

वर्णपदलक्षणस्योभयरूपस्यास्य[6] शब्दत्वे समाने पदानां क्रमाद्वाक्यार्थस्यावगमो दृश्यते न दिव्यतः पदान्येवार्थवन्ति। तत्क्रमश्चैव वाक्यम्। संसर्गो वाक्यार्थ इति ॥५३॥

इदानीं सङ्घातः क्रमस्तथैकोनवयवश्च शब्दः स्फोटात्मेति व्याख्यातानि त्रीणि वाक्यलक्षणानि श्लोकत्रयेणोपसंहरति। तत्र सङ्घातपक्षमुपसंहर्तुं तावदाह—

यथा सावयवा वर्णा विना वाच्येन केन चित्।
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ॥५४॥

१. इतः पूर्वं—ततोभिन्नमिति शपः इत्यधिकम्—छ ४.
२. भावाः—ग १. ३. ४.
३. °निवेशिता—क २.
४. सामान्येपि—क २.
५. त्व—ग १. ३. ४, छ ५, ज. अयं चापपाठः। विरुद्धार्थप्रतीतेः।
६. °स्यास्य—छ ४, ज.

वर्णानां समुदायार्थवेत्त्वे केवलानामनर्थकत्वं यथा तथा पदानां केवलानामर्थासंभवात्तत्समुदाय एव वाक्यमिति व्याख्यातम्[2] ॥५४॥

क्रमपक्षमप्युपसंहर्तुमाह—

अनर्थकान्युपायत्वात्पदार्थेनार्थवन्ति[3] वा ।
क्रमेणोच्चारितान्याहुर्वाक्यार्थं[4] भिन्नलक्षणम् ॥५५॥

पदानि केवलान्यनर्थकानि, केषां चिन्मते स्वार्थेनार्थवन्ति, क्रमेणोच्चारितानि वाक्यम् । तथाविधाद्वाक्याद्वाक्यार्थं भिन्नलक्षणं व्यतिरिक्तस्वरूपं संसर्गात्मकं विशिष्टमेव वा संसर्गवशान्निराकाङ्क्ष[5]विशेषावस्थितपदार्थस्वरूपमेव व्यतिरिक्तमवगम्यते ॥५५॥

स्फोटपक्षमप्युपसंहर्तुमाह—

नित्यत्वे समुदायानां जातेर्वा परिकल्पने ।
एकस्यैवार्थतामाहुर्वाक्यस्याव्यभिचारिणीम्[7] ॥५६॥

इह देवदत्त गामभ्याज शुक्लां दण्डेन इत्यादिकानि भिन्नवक्त्रुदीरितानि[8] पदसमुदायात्मकानि शब्दरूपाद्भिन्नान्येव । अयमर्थः । तत्र तत्र वक्तरि भिन्ना अपि ध्वनय एकमेव स्फोटं व्यक्तिस्फोटात्मकं नित्यमभिव्यञ्जन्ति । देवदत्त गामभ्याजेत्यादिकेषु भिन्नवक्त्रुदीरितेषु वा स्फोटजातिर्नित्या देवदत्तपदसमुदायाभिव्यङ्ग्या वाक्यार्थस्यैकस्य प्रतिभात्मकस्य प्रतिपादिकेति मतभेदाज्जातिव्यक्तिस्फोटोपसंहारः ॥५६॥

तदेवं सङ्घातादीनि त्रीणि वाक्यलक्षणानि व्याख्यातानि । आख्यातं वाक्यमिति व्याख्यास्यति । एषां च मध्याद् इति सूत्रकाराभिप्रायमनुसृत्याखण्डपक्ष एव वाक्यवाक्यार्थयोरुभयोरभ्युपगम्यत इति प्रदर्शितम् । इदानीं भाष्यकाराभिप्रायेणापि स एवाभ्युपगन्तव्य इत्युपक्रम्यते । तथा च **भाष्यम्—न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्** ।[10] तथा । **यथालक्षणमप्रयुक्ते**[11] इति । अत्र यदि पदानां सत्यता स्यात् तदा तेषां स्वत एव सिद्धत्वात् पदानि कुर्वन्तीति पदकारा इत्येतदसङ्गतं स्यात् । लक्षणेन च तदननुवर्तनं वस्तुसत्त्वात्तेषाम् । पदकारैर्नाम लक्षणमनुवर्त्यमित्यप्यसंगतम् । तथाप्रयुक्तपदविषये पदानां सत्यत्वात् तत्प्रविभागोऽयं न सिद्ध इति । यथालक्षणं लक्षणानुसारेण पदकरणमप्रयुक्तमित्येतदनुपपन्नमेव । आह चैवं भाष्यकारः । तस्मान्मन्यामहे पदान्यसत्यानि, एकमभिन्नस्वभावकं वाक्यम् । तदवबोधनाय पदविभागः कल्पित इति । एतदेवाभिधातुमाह—

अभेदपूर्वका भेदाः कल्पिता वाक्यवादिभिः ।

यत एवं सूत्रकारस्य भाष्यकारस्य चाखण्डपक्षोऽभिरुचितः । तस्माद्वाक्यवादिभिः स्फोटवादिभिरभेदकल्पनमाश्रितम् । काल्पनिकः पदवादोऽभ्युपगत इत्यर्थः ।

पदवादिमतमपि प्रसङ्गादुपदर्शयति—

भेदपूर्वानभेदांस्तु मन्यन्ते पददर्शिनः ॥५७॥

भेदप्रतिभासपूर्वकानभेदान् स्वाभिमतान् पददर्शिनः, पदमेव सत्यं ये मन्यन्ते ते, ह्येकमखण्डं वाक्यं नाम काल्पनिकमाहुः ॥५७॥

पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः संहिता वा पदाश्रया ॥५८॥

…ति तत्पुरुषवृत्त्या शब्दसंस्कारमाचक्षाणा विवक्षितमर्थं प्रतिपादयन्ति । तेषां तु चतुर्णामेव पदजातानां संसर्गमात्रेण पदेष्वेव प्रसिद्धः सम्बन्धः कश्चिद्र्थात्मा प्रकाश्यते । ते बहुव्रीहिवृत्त्या शब्दसंस्कारमाचक्षाणाः तथैव विवक्षितमर्थं प्रतिपादयन्ति । तत्र केषां चित्पौरुषेयाण्याम्नायपदानि शब्देषु स्मृतिपक्षस्य वा । केषां चित्तु पदरूप एवाम्नायः संहिता पौरुषेयी स्मृतिपक्षस्य वा (?) ।

केषां चित्तु नित्यावुभावप्येतौ समाम्नायौ । पदसमाम्नायस्तु प्रतिपादकत्वेन नित्यः, इतरस्तु प्रतिपाद्यत्वेन नित्यः । केषाञ्चिन्नित्यस्यैकस्याम्नायस्य द्वे एते विभागाविभागशक्ती प्रतिपादकप्रतिपत्तव्यरूपेण वर्तेते ॥५८॥

अथ यदि नैवं स्थितिः तत्कथं **पदप्रकृतिः संहिता** इति प्रातिशाख्यम् । अत्र हि पदानि प्रकृतिर्यस्याः संहिताया इत्यर्थो व्याख्यायते । पदानां चासत्यत्वात् तत्कारणिका संहिताऽप्ययुक्ता स्यादित्यालोच्याखण्डपक्षेणाप्येतत्संवादयितुमाह—**पदप्रकृतीति** ।

वृत्तिभेदमेव प्रदर्शयितुमाह—**पदानाम्** इति ।

अखण्डपक्षे पदप्रकृतिः संहितेति षष्ठीसमासेन व्याख्यायत इत्यर्थः ॥५८॥

पदाम्नायश्च यद्यन्यः संहिताया निदर्शकः ।
नित्यस्तत्र कथं कार्यं पदं[8] लक्षणदर्शनात् ॥५९॥

१. °र्थत्वे—छ ४.
२. व्याख्यातमिति पदं क्रमपक्षमित्यादिना न सम्बन्धुं युक्तम् । पुरस्ताद् इति व्याख्यातानि त्रीणि लक्षणानि श्लोकत्रयेणोपसंहरतीत्युक्तत्वादत्र पौनरुक्त्यं स्यात् । अतः कारिकेन परिष्कर्त्रा न साध्वपाठीति विद्मः ।
३. अनर्थकान्यपा°—ग १. ३. ४.
४. क्रमेणोच्चरिता°—ग १. ३. ४.
५. निराकाङ्क्ष—ज.
६. एकस्यैकार्थ°—क ५. ७, ज.
७. °र्वाच्यस्या°—ज.
८. भिन्नवदुदी°—छ १. जसंज्ञके तु पूर्वं भिन्नवक्त्रुदीत्यादि विन्यस्य पश्चाद् भिन्नवदुदीत्येवं विपरिवर्तितम् ।
९. उभयो इति नास्ति—ख.
१०. पा० महा० भा० ३।१।१०९॥२ वार्तिके.
११. पा० महा० भा० १।१।२४॥३ वार्तिके.

१. नेदं भाष्यकृद्वचनम् । तस्य भगवतोऽखण्डपक्षोऽभीष्ट इति भाष्ये श्रुत्या नोक्तम् । लक्षणेन पदकारा इत्याद्युक्तेः फलितार्थोऽयम् ।
२. °दांश्च—क १. २. ५. ७, ख.
३. व्यक्तिभे°—ग ४.
४. वर्तते—ग ३.
५. एतद्विषय इहैव (२।२॥) टिप्पणे द्रष्टव्यम् ।
६. यदाम्नायश्च—ग १. ४.
७. निदर्शितः—ग ३.
८. पद—ग १. ३. ४.

यद्यन्य एव पदाम्नायो नित्यः पुरुषप्रयत्नव्यतिरेकेण सिद्धस्तत्रायं भाष्यग्रन्थः समर्थयितव्यः। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्, यथालक्षणं पदं कर्तव्यम् **इति।** लोकेप्यर्थेन प्रयुक्तेषु शब्देषु शास्त्रेण धर्मनियममात्रमेव क्रियते। अतः शास्त्रेण नित्यस्य लक्ष्यस्यानुविधानं कर्तव्यं न तु नित्येन लक्ष्येण शास्त्रमनुविधेयम्। अपि च बहुशक्तेः समाम्नायस्य कैश्चित् पदकारैः काचिद्विभागशक्तिरनुगम्यते। वक्षस्सुरुक्मेति वक्षस्सु रुक्म इति। तदेवं विभागशक्त्यन्तरदर्शनेन प्रवृत्तेर्विभागशक्त्यन्तरस्यापसारितत्वात् न शक्त्यन्तरदर्शनप्रक्रमो यथालक्षणं पदानां करणं संभवति ॥५९॥

इदानीं येनाभिप्रायेण भाष्ये न लक्षणेनेत्यादिकमुक्तं तमभिव्यङ्क्तुमाह—पदाम्नायश्चेति।

यदि हि पदाम्नायः संहिताप्रदर्शको नित्यः सत्यभूतोऽभ्युपगतस्तदा कथं लक्षणदर्शनात् पदं कार्यमिति न लक्षणेन पदकारा इत्यादिना भाष्यकारो दर्शयेत्। यतश्च पदान्यसत्यानि तस्य प्रतिभासन्ते तत एवमभिहितमिति भाष्यकारस्याप्यखण्डपक्षोभिप्रेत इति दर्शितम् ॥५९॥

अपरे तु मन्यन्ते—वाक्यार्थ एकः, तेन चात्यन्तमनर्थकान्येव पदानि यथैव च पदार्थेन वर्णाः।

> **प्रतिवर्णमसंवेद्यः पदार्थप्रत्ययो यथा।**
> **पदेऽप्येवमसंवेद्यं वाक्यार्थस्य निरूपणम् ॥६०॥**

यथैव वर्णे वर्णे पदार्थप्रत्ययो नोत्पद्यते इत्यर्थो न विभज्यते तथैव पदे पदे वाक्यार्थस्यासंनिधानात् प्रतिपदं तद्विषयोपि प्रत्ययो न निरूपयितुं शक्यते। अर्थनिर्भासा हि प्रकाशस्वरूपत्वादात्मनिरूपणा एव। अतश्च बाढमर्थानामपि **संवेद्यत्वं न व्यतिक्रामन्ति ॥६०॥**

इदानीं पदवादिनं प्रति दूषणमाह—**प्रतिवर्णम्** इति।

देवदत्तादौ पदे यथा न दकारादिवर्णे वर्णे प्रति देवदत्तप्रत्ययो जायते तथैव देवदत्त गामभ्याजेत्यादिवाक्यार्थस्य देवदत्तादिपदे पदं प्रति नास्ति प्रत्ययः। अत उच्यते एतान्यनर्थकान्येव, वाक्यादेवार्थप्रतीतिदर्शनात् वाक्यमेवार्थवदिति ॥६०॥

यस्य तु वाक्यार्थे पदानि प्रतिभेदमर्थवन्ति तस्य पदार्थेन वर्णाः प्रतिभेदमर्थवन्तः प्राप्नुवन्ति।

> **वाक्यार्थः संनिविशते पदेषु सहवृत्तिषु।**
> **यथा तथैव वर्णेषु पदार्थः सहवृत्तिषु ॥६१॥**

[प्रतिवर्णं] **यदि पदेषु सहवृत्तिष्वपि सन्निविष्टो वाक्यार्थः प्रतिपदं निविष्ट इति कल्प्यते तथैव सहवृत्तिषु वर्णेषु कामं संनिविष्टः पदार्थः कल्पयितव्यः ॥६१॥**

एतावत् प्रतिविधातुं पदवादयाह—**वाक्यार्थ** इति।

१. पदार्थः प्र°—ग १, ज.   २. यदा—ग १.

इह पदे वर्णा अर्थवन्तो [illegible] इत्युक्तम्। [illegible] यथा समुदितेषु [illegible] वाक्यार्थः संनिविशते [illegible] [illegible] इति। नेतावता वर्णदृष्टान्तेन पदानामनर्थकत्वम् ॥६१॥

यदि तर्हि पदार्थः प्रतिवर्णं निविष्टः कस्मात्पदस्यैव प्रयोगे [illegible] कश्चिदर्थो न प्रतीयते—

> **सूक्ष्मं[1] ग्राह्यं यथान्येन संसृष्टं सह गृह्यते।**
> **वर्णोऽप्यन्येन[2] वर्णेन संबद्धो[3] वाचकस्तथा ॥६२॥**

यथा हि सूक्ष्मं ग्राह्यं दूरात्केशमक्षिकाद्यन्तिके च वातायनरजः केवलं नोपलभ्यते। संसृष्टं त्वसंयुक्तमप्युपलभ्यते। वर्णोऽप्येवमेवासत्यपि शब्दान्तरप्रादुर्भावेऽन्येन सम्बद्धः सत्यप्यर्थयोगे पूर्वमगृहीतस्यार्थस्य प्रत्यायको भविष्यति ॥६२॥

एतदेव दृष्टान्तेन दर्शयितुमाह—**सूक्ष्मम्** इति।

ग्राह्यमपि सूक्ष्मं वस्तु रजःप्रभृति यथान्येन केन चित्सजातीयेन विलक्षणेन वा संसृष्टं सद् गृह्यते। एवमर्थवानपि वर्ण एकैकं न संप्रत्यायकोऽन्येन संसृष्टस्तु वाचक एव। एतदुक्तं भवति। अर्थवन्त एव वर्णाः, प्रतिपत्त्रा तु पाटवविरहादेकैकं न तथा गृह्यन्त इति नात्र तेषामपराधः ॥६२॥

> **पदस्योच्चारणादर्थो यथा कश्चिन्निरूप्यते।**
> **वर्णानामपि सान्निध्यात्तथा सोर्थः प्रतीयते ॥६३॥**

पदे किलोच्चारिते योऽर्थो निरूप्यते तेनार्थेन तदुच्चरितं पदं तदर्थवदिति वा प्रतिज्ञायते। वर्णेष्वप्युच्चरितेषु पदवत्स एवार्थस्तथैव प्रतीयते। तस्माद्येनैव हेतुना पदार्थवादी पदस्यार्थवत्तां प्रतिजानीते तेनैव हेतुना केवलवर्णार्थवाद्यपि वर्णस्यार्थवत्तां प्रतिजानीते इति ॥६३॥

न चानर्थकमेव पदमिति वक्तुं युक्तं प्रत्यक्षविरोधादित्याह—**पदस्येति**।

न हि किं चित् पदं केन चिदर्थेनानिरूपितमिति युज्यते वक्तुमनुभवविरोधात्।

यथा चैवं पदोच्चारणकालेऽस्ति काचिदर्थप्रतीतिरेवं तेनैवार्थेन संहता अप्यर्थवन्त इति प्रतिपादयितुमाह—**वर्णानाम्** इति।

केवलं सान्निध्यात्सहोच्चारणादसावर्थस्तेषां प्रतीयते। तस्माद्यथा समुदिताः परस्परानुप्रवेशाद्वर्णा वाचका एवं पदान्यपि तथैवेति वर्णपदव्यतिरेकेण वाक्यं नाम नास्तीति। तदुक्तम्।

> **यावन्तो यादृशा ये च यदर्थप्रतिपादने।**
> **वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः[4] ॥ इति ६३॥**

येषामत्यन्तसंसृष्टस्याश्रयविशेषवद्भिः साधनैः क्रियाविशेषैस्स्वार्थे[illegible]

१. सूक्ष्म—ग १. ३. ४.
२. °प्येनेन—क १. २. ५. ७.
३. संबन्धो—मूलकोशाः. टीकागतस्य पाठस्य साधीयस्त्वात्स एवादृतः।
४. °थैवा—ज.
५. मी० श्लो० वा० स्फोटवादे [illegible] श्लोकः ।

लब्धपदविभागमेकमभिन्नस्यार्थस्य वाचकं वाक्यं तेषामङ्गभ्रेषे यत्र प्रतिनिधिरुपादीयते तत्र क्रियायाः प्रतिनिधिः प्राप्नोति। अप्रतिनिधेया च क्रिया, तस्मात् प्रसक्तानुप्रसक्तं प्रतिनिधिसम्बन्धेनेदमुच्यते—

प्राप्तस्य यस्य सामर्थ्यान्नियमार्था पुनः श्रुतिः।
तेनात्यन्तं विशेषेण सामान्यं यदि बाध्यते ॥६४॥

इह यजेतेत्याह द्रव्यदेवतास्सामर्थ्यप्राप्ताः। न हि द्रव्यं देवतां साधनं चान्तरेण यजतिशब्दप्रयोगलक्षणार्थस्याभिधानशक्तिरस्ति। तत्र द्रव्यं यजतिक्रियारूपैकदेशभावादङ्गत्वेन श्रुतिप्राप्तसंनिधानम्। व्रीहित्वादयस्तु सामान्यविशेषा विरुद्धैकार्थसमवाया अप्यविरुद्धैकार्थसमवायेन द्रव्यत्वेनादृष्टसाहचर्यव्यभिचाराः सामान्यमात्राप्राप्तसंनिधानाः। तेषां नियतेऽपि सन्निधाने शब्दरूपेणानुपादानाद् द्रव्यत्ववदङ्गभावो न प्रतीयते। यस्य तु सामर्थ्यमात्रेणाऽपि प्राप्ता व्रीहित्वादयः पुनः श्रुत्या नियम्यमानानां यवत्वादीनां सामान्यविशेषान्तराणां निवर्तका इति दर्शनं तस्य व्रीहित्वेन यवत्वादिसहचारिणो द्रव्यस्यात्यन्तं श्रुतिलक्षणमपसारणं प्राप्नोति ॥६४॥

यदि च पदार्थनिबन्धनो वाक्यार्थविभासो नाङ्गीक्रियते तदा प्रतिनिधिकल्पनं, पिकादिनियतपदप्रश्नः, श्रुतिवाक्ययोर्विरोधे श्रुतिर्बलीयसीति, अवान्तरवाक्यानामर्थवत्त्वं च न स्यात्, लक्षणानुपपत्तिश्चेति पञ्च चोद्यान्यापतन्ति। तानि क्रमेण प्रदर्शयितुमाह—प्राप्तस्येति।

इह यजेतेत्याख्यातपदप्रतिपाद्यो यजनविधिरुपदिश्यते। तत्र क्रियाप्रधानमाख्यातम् इत्यत्र यजतिक्रिया साधननिर्वर्त्येत्यसौ कारकमात्रस्याक्षेपिका। कदाचिद्विशिष्टस्यैवेति द्वयी गतिः। तत्र यस्य व्रीहित्वस्य यजतिक्रियासामर्थ्यात्प्राप्तस्य व्रीहिभिर्यजेत इति पुनर्व्रीहिश्रुतिरुच्चरन्ती नियममवगमयति व्रीहिभिरेव न यवैरिति। ततश्च तेन द्रव्यविशेषेणात्यन्तं द्रव्यसामान्यमात्रं यदि बाध्यते ॥६४॥

यजेतेति ततो द्रव्यं प्राप्तं सामर्थ्यलक्षणम्।
व्रीहिश्रुत्या निवर्तेत न स्यात्प्रतिनिधिस्तथा ॥६५॥

यदि सामान्यलक्षणप्राप्तं यवादिद्रव्यं व्रीहिश्रुत्या शास्त्रेण प्रतिषिध्यते तच्छास्त्रान्तराभावाद्यथैवान्यानि द्रव्याण्ययाज्ञियानि तथा व्रीहीणामसन्निधाने नैव प्रतिनिधेयं स्यात्। सत्यप्यर्थित्वे दृष्टेऽपि सामर्थ्ये शास्त्रेणापर्युदस्तस्याधिकारो युक्तः। तस्मान्मा भूत् प्राप्तस्यासहचरितस्य प्रतिनिधिरभावात् इति ॥६५॥

अतः किमित्याह—यजेतेति इति।

यजेतेत्यनया क्रियया निःसाधना क्रिया न भवतीति सामर्थ्याद्यदाक्षिप्तं द्रव्यमात्रं तद्व्रीहिभिर्यजेतेति पुनर्व्रीहिश्रुत्या बाधितं सन्निवर्तेत, तदभावे प्रतिनिधिर्न स्यात्। क्रियया द्रव्यमात्राक्षेपे

१. का०
२. यदा—सर्वेषु टीकाकोशेषु काशिसंस्करणे च।
३. निवर्त्येत—
४. तदा—ख, टीकाकोशाः.
५. °त्यनया छ ३,५.

व्रीहिलक्षणस्य द्रव्यस्याभावे तत्सदृशं द्रव्यान्तरमेव नीवारादिकं समानीय तन्निर्वर्तनं क्रियते। विशिष्टद्रव्याक्षेपे तु तया कृते तदुपादानं नियमाय पर्यवस्यतीति कथं व्रीहिकरणकं यजनमन्यो निर्वर्तयेदिति प्रतिनिध्यभावः। तस्माद्द्रव्यमात्राक्षेपे प्रतिनिध्युपपत्तिः ॥६५॥

इदमन्यद्दर्शनमाश्रीयते। शब्देनानङ्गीकृतं व्रीहित्वमङ्गभावेनाधिकं व्रीहिशब्दः प्रकल्पयतीति निगमयति—

तस्माद्व्रीहित्वमधिकं व्रीहिशब्दः प्रकल्पयन्।
द्रव्यत्वमविरुद्धत्वात्प्राप्त्यर्थः सन्न बाधते ॥६६॥

व्रीहिशब्दो ह्यधिकार्थाध्यावापायोपादीयमानो द्रव्यत्वमविरुद्धैकार्थसमवायं प्राप्त्यर्थः सन्न बाधते। न हि यवत्वादीनां वृत्तौ तस्य व्यापारोऽस्ति, नाप्यनुज्ञायाम् ॥६६॥

तदेतदेव दर्शयितुमाह—तस्मात् इति।

तस्माद्द्रव्यमात्राक्षेपे व्रीहिशब्दोऽत्र प्राप्त्यर्थो व्रीहित्वमात्रप्रापणप्रयोजनो व्रीहित्वमेवाधिकं कृत्वाभ्युपकल्पयन् प्रकटीकुर्वन् द्रव्यत्वं न बाधते। अविरुद्धत्वात् सामान्यस्य विशेषेण सहाविरोधात् ॥६६॥

इदं च द्रव्यत्वस्य बाधनं यत्सामान्यविशेषान्तरैश्च साहचर्यादवच्छेदः।

तेन चापि व्यवच्छिन्ने द्रव्यत्वे सहचारिणि।
असंभवाद्विशेषाणां तत्रान्येषामदर्शनम् ॥६७॥
न च सामान्यवत्सर्वे क्रियाशब्देन लक्षिताः।
विशेषा न हि सर्वेषां सतां शब्दोभिधायकः ॥६८॥

यदि तर्हि व्रीहिश्रुतिर्न नियमार्था तर्हि विकल्पितत्वं यवादीनां कस्मान्न विज्ञायते। तत्राहुः। असंभवो नाम नियमशब्दव्यापारो नियमसदृशफलः। कश्चिद्विषयेऽन्य एव धर्मोऽयमसंभवनियम इति नियमविभागे न्यायविदः केचिदाचक्षते। यत्र व्रीहित्वमधिकं शब्देनाङ्गभावं प्रतिपद्यते तत्र विरुद्धैकार्थसमवायत्वादप्रतिषिद्धान्यपि श्रुत्या यवत्वादीनि न संभवन्ति। यदि च संभवेयुः काममविरोधसामर्थ्यप्राप्तसन्निधानानि विना शब्दव्यापारेण समुच्चीयेरन्। न त्वेव विकल्पस्य विषयः। न च सामान्यवत् क्रियाशब्देन लक्षिता विशेषाः। न हि सर्वेषां सतां शब्दोऽभिधायकः ॥६७।६८॥

अतश्च किमित्याह—तेनेति।

१. प्रकल्पयेत्—मूलकोशाः।
२. °प्राप्तं—ग १.३.४.
३. इतः परं च इत्यधिकम्—ग १.३.४.
४. दाक्षिणात्यकोशानुसारेण एतत्कारिकायाः

इदं स्वरूपम्—
तस्माद् व्रीहित्वमधिकं व्रीहि[illegible] प्रक[illegible]
द्रव्यत्वमविरुद्धत्वात्प्राप्तं [illegible] च [illegible]

गतकार्यातिदेशः । ब्राह्मणवदस्मिन्ब्राह्मणे वर्तितव्यमिति । अत्र ये ब्राह्मणे ब्राह्मणवदेव वर्तन्ते तान् प्रत्ययमेवंभूतोऽतिदेशो विज्ञायते । येषां तु बुद्ध्यसंभेदात्प्रसङ्गाद्वा व्यतिकरः तेषु नियम एव क्रियते । उक्तं च—

सामान्यमात्रं शब्दार्थो[2] विशेषा व्यभिचारिणः ।

सामर्थ्यमन्तरेणातो विशेषो नातिदिश्यते[3] ॥ इति ॥

तत्र वेदे यथा । **आग्नेयवत्सौर्ये**[4] इत्यत्रैकदेवताकस्यैकदेवताकसंबन्ध्येव विध्यन्त इति विध्यन्त इति-कर्तव्यतोच्यते । शास्त्रे रूपातिदेशादिभिः षड्भिः प्रकारैर्विशेषातिदेशः परिदृश्यते । तत्र रूपातिदेशो यथा । **द्विर्वचनेऽचि**[6] इत्यत्र हि धातुरूपमेवादेशस्यातिदिश्यते । ततश्च या क्रु इत्यादीनामेव द्विर्वचनं भवति । यथा ययतुश्चक्रतुरिति । निमित्तातिदेशो यथा । **पूर्ववत्सनः** इति । अत्र पूर्वस्य यन्निमित्त-मात्मनेपदे ङकारादि तदेव सन्नन्तस्यातिदिश्यत इति । तादात्म्यातिदेशो यथा । **सुबामन्त्रिते पराङ्ग-वत्स्वरे**[8] इति । सुबन्तमामन्त्रितस्य मृत्पांमूदकवत् तादात्म्यमापद्य तत्स्वरं लभत इति । शास्त्राति-देशः कार्यातिदेशो वा यथा । **कर्मवत्कर्मणा तुल्यक्रियः**[9] इति । अत्र हि शास्त्रातिदेशे यकः शपा बाधनं स्यादिति यग्विधौ कर्मकर्तर्युपसंख्यानमारभ्यते । विप्रतिषेधाद्धि शपो बलीयस्त्वमिति । कार्यातिदेशे तु कर्मवत्कर्मणा इत्यनेनैव यग्विधीयत इति यक एव परत्वान्नास्त्यस्य शपा बाधेति नोपसंख्यानारम्भः । व्यपदेशातिदेशस्तु व्याकरणे नैव सम्भवति । संज्ञापक्षादविशेषाद्वत्करणवैफल्य-प्रसङ्गाच्चेति ॥७९॥

अथाधिकारस्य निदर्शनम् । अर्थित्वं सामर्थ्यं शास्त्रापर्युदासयोगित्वमधिकारः । स विद्यते यस्यासावधिकारी । अर्थित्वमधिकारकारणम् । परं हि पुरुषार्थमत्रापवर्गमाचक्षते । अस्मादप्यर्थी प्रमाद्यति कश्चिदिति सत्येवार्थित्वे सामर्थ्यमधिकारकारणम् । उत्पन्नायामपि ह्यभिनयनदिदृक्षाया-मन्धो दर्शने नाधिक्रियते । अर्थिनः खल्वपि सामर्थ्याभावः केषु चित्कर्मसु शास्त्रेण पर्युदासात् । यथा शूद्राख्यां नाधिक्रियन्ते । अदृष्टार्थविशेषे हि सामर्थ्यासामर्थ्ये शास्त्रादेव समधिगम्येते । तस्मात्प्रधानमधिकारकारणं शास्त्रोपदेशमाचक्षते । तत्र लोके यथा । अद्य प्रभृति त्वमत्र ग्रामे नगरे वाऽधिकृत इति राजा नियुङ्क्ते । वेदे यथा । **अग्निहोत्रं जुहुयात्स्वर्गकामो ब्राह्मणः**[11] इत्यत्र ब्राह्मणस्यार्थित्वादिभिरधिकार इति । शास्त्रस्य तु शब्दार्थपुरुषधर्मेष्वधिकारः ।

तत्र षोढा शब्दः । साधुरसाधुश्च । साधुरपि शास्त्रीयः प्रायोगिकश्च । शास्त्रीयोपि त्रेधा ।

१. इत्यतः पूर्वं यथा इत्यधिकम्—का०.
२. शब्दार्था—ज.
३. मृग्यम्.
४. मृग्यम्.
इदं पूर्वं विन्यस्य पश्चाद्द्वयोर्म्यादितम्—ज ।
५. विध्यन्तम् इति का०
६. पा० ६।१।५९॥
७. पा० १।३।६२॥
८. पा० २।१।२॥
९. पा० ३।१।८७॥
१०. भावकर्मणोर्यग्विधाने कर्मकर्तर्युपसंख्यानम् इति वार्तिकस्वरूपम् पा०महा० भा० १। १।६७॥ वा०
११. मै० उ० ६।३६॥ तत्र ब्राह्मण इति पदं न श्रूयते ।

प्रतिपाद्यः, प्रतिपादक उभयरूपश्च । तत्र प्रतिपाद्यो यथा । दाधर्त्यादिर्निपात्यमानः । प्रतिपादको यथा । प्रकृतिप्रत्ययादिः । तेन हि कुम्भकारादिः प्रयोगस्थः प्रतिपाद्यते । उभयरूपो यथा । इतव्यशब्दः । स हि तव्यशब्देन प्रतिपाद्यते, प्रयोगस्थं च से इतव्यशब्दं प्रतिपादयति । प्रायोगिकश्च लौकिकवैदिकभेदेन द्विधा । इत्येवमसाधुना सह षोढा शब्दः । तेषु मध्ये प्रतिपाद्येषु व्याकरण-शास्त्रस्याधिकारः । न प्रकृत्यादिषु । न हि ते व्याकरणेन व्युत्पाद्यन्त इति ।

अर्थो ऽष्टादशधा । तत्र वस्तुमात्रमभिधेयश्च । अभिधेयोपि द्विधा । शास्त्रीयो लौकिकश्च । पुनरपि विशिष्टावग्रहसंप्रत्ययहेतुस्तद्विपरीतश्च । मुख्यः परिकल्पितरूपविपर्यासश्च । व्यपदेश्यो ऽव्यपदेश्यश्च । सत्त्वभावमापन्नो ऽसत्त्वभूतश्च । स्थिरलक्षणो विवक्षाप्रापितसंनिधानश्च । अभिधीयमानः प्रतिपाद्यमानश्च । अभिसंहितो नान्तरीयकश्चेति । तत्र वस्तुमात्रं बाह्योर्थो[2] यो वक्तुं प्रतिपादयितु न समीहितः । यस्तु समीहितोऽसावभिधेयः । तत्रैव च शब्दस्याधिकारः । स च द्विधा शास्त्रीयलौकिकभेदेन । तत्र शास्त्रीय आवापोद्धारिकः । लौकिकस्त्वखण्डः । लौकिके चार्थे शब्दस्याधिकारो न शास्त्रीये । शास्त्रीयो हि पौरुषेयः परिकल्पितः । एवमतथाभूतोपि शब्दसाधुत्वस्य निमित्तभावेन प्रतिपादको विज्ञायते । अतश्च तस्य व्यभिचारे ऽप्यव्यभिचार एव स्मर्तॄणाम् । स चानियतावधि बहुधा प्रविभज्यते व्याख्यातृभिः । विशिष्टावग्रहसंप्रत्ययहेतुर्यथा । कंसं घातयति बलिं बन्धयतीति । अत्र ह्यर्थो न तथाभूतोपि तु विशिष्टाकारेणैव संप्रत्ययेन गोचरीकृतो व्यवहार-विषयतामनुपतति । तद्विपरीतो यो बहिरेव तथा व्यवस्थितः । यथा गौः शुक्ल इत्यादि । मुख्यो यथा सास्नादिमान् गौरिति । परिकल्पितो निमित्तवशेन रूपविपर्यासो यस्यासौ परिकल्पितनिमित्त-रूपविपर्यासो गौणोर्थ उच्यते । यथा गौर्वाहीक इति । व्यपदेश्य आवापोद्धारिक एव जातिर्वा द्रव्यं वेत्येवमुक्त इति । अव्यपदेश्यस्त्वखण्ड एव वाक्यार्थलक्षण इति । सत्त्वभावमापन्नो व्यपदेश्य एवावापोद्धारिकसंज्ञकः । असत्त्वभूतो वाक्यार्थलक्षण एव । उक्तिभेदादेवात्र प्रायशो भेदकथनम् । स्थिरलक्षणो यथा । राजपुरुष इत्यत्र राजसम्बन्धित्वं पुरुषस्य । तद्धि न व्यभिचरति । विवक्षा-प्रापितसंनिधानो यथा । राज्ञः पुरुषस्येति । अत्र हि सम्बन्धित्वं व्यभिचरति । विशेषणविशेष्ययोर्य-थेष्टत्वात् । अभिधीयमानो यथा । राजसख इत्यत्र राज्ञः सखायमित्यर्थोभिधीयते । तस्मिंस्त्वभिधीय-माने राजा सखा ऽस्येत्ययमर्थः प्रतीयमान एव । अभिसंहितो यथा । गोशब्दे जातिर्द्रव्यं वेति । नान्तरीयको यथा । तत्रैव वर्णसंस्थानादिः । इत्येवमभिधेयभेदा उपदर्शनीयाः ॥

पुरुषधर्मा वक्तृत्वप्रतिपत्तृत्वप्रभृतयः । तत्र वक्तृधर्मा आबाधं असूयासंमतिकोपकुत्सनभर्त्स-

१. शयितव्य°—ज. नेदं साधु । यतो हि सेट्केभ्यो धातुभ्यस्तव्ये प्रत्यये निष्पन्नेषु सर्वेषु प्रयोगेषु वर्तमानस्य इतव्यशब्दस्या-यमप्रयुक्त इतव्यशब्दः प्रतिपादकः । शयितव्यादिविशेषनिर्देशस्तु न युज्यते ।
२. बाह्यार्थो—का०
३. आपोद्धारिक:—ज, शास्त्रेऽपोद्धा-कृतः पदादीनामर्थ इति शिष्यते । अवापोपि तदुपायत्वेन श्रूयते । तेनास्मदुपात्त एव समीचीनः पाठः ।
४. आपोद्धारिक—ज.
५. एवापोद्धारिक°—ज.
६. अत्र आकरो न [illegible] इति पाणि-नीये सूत्रे द्रष्टव्य ।

नादयश्चेति[1] । प्रतिपत्तृधर्मास्तु कुत्स्यमानत्वप्रभृतय एव । तत्र शास्त्रस्य प्लुतद्विर्वचनादिविधायकत्वे-नाधिकार इति । अत्र च य एव धर्माः शब्दानां शास्त्रस्य चानधिकारविषयत्वेनोक्तास्तानेवापेक्ष्यो-च्यते—**व्युदासोऽस्य क्रियान्तरे** इति ॥८०॥

अथ क्रमस्य निदर्शनम् ।

इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभिः । इति ।

श्रुत्यादिभेदेनायं क्रमोऽनेकप्रकारः[2] । तथा च । श्रुतिक्रमोऽर्थक्रमः, पाठक्रमः, काण्डक्रमः, प्रवृत्तिक्रमः, प्रतिपत्तिक्रमः, प्रयोगक्रमो, बुद्धिक्रमश्चेति ।

तत्र श्रुतिक्रमो यथा । स्नात्वा व्रजतीति । अत्र क्त्वाप्रत्ययेनैव श्रुत्या क्रम उक्तः । वेदे यथा । **हृदयस्याग्रेऽवद्यत्यथ जिह्वायाः**[3] इत्यत्र श्रुत्यैवाग्रेऽथशब्दाभ्यां क्रम उक्तः । शास्त्रेपि च **परस्मैपदानां णलतुसू**[4] इत्यादौ **यथासंख्यमनुदेशः समानाम्**[5] इति श्रुत्यैव क्रमः ।

अर्थः सामर्थ्यं तन्निमित्तः क्रमोऽर्थक्रमः । यथा । भुक्त्वा स्नात्वा व्रजतीत्यत्र स्नानादीनामन्यथा शब्दोपात्तानामप्यर्थस्वरूपपर्यालोचनया स्नानादिक्रमो लक्ष्यते । वेदे यथा । **अग्निहोत्रं जुहोति यवागूं श्रपयति**[6] इत्यत्र श्रपणं पश्चाद्विनिर्दिष्टमपि पूर्वमनुष्ठीयते ततोऽग्निहोत्रमित्यर्थक्रमः । शास्त्रेपि गुणकर्मणि लादिविधिरित्युक्तम् । तथा हि गां दोग्धि पय इत्यत्र गवा कर्मणा पूर्वं दुहेर्योगस्ततः पयसः, न ह्य-नुपादाय गां कश्चित्पय आदातुमर्हति । तस्मादत्र गोपयसोर्दुहिना यैः क्रमेण सम्बन्धः सोर्थसामर्थ्यादु-पजायते । तस्मात्सत्यपि प्रधाने पयसि दुहेर्गवैव पूर्वं सम्बन्ध इति तत्रैव लादयोन्तरङ्गत्वादुत्पद्यन्ते गौर्दुग्धा सुदोहा गौरिति ।

उच्चारणक्रम एव पाठक्रमो यथा ।

इन्दुस्वर्णैणमातङ्गपुंस्कोकिलकलापिनः ।
वक्त्रकान्तीक्षणगतिस्वरकेशैस्त्वया जिताः ॥[8]

इत्यत्र यथापठितानां यथापठितैरेव सम्बन्ध इति । वेदे यथा । **समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति**[10] इत्येवमात्मकेषु प्रयाजेषु यथापाठमेव क्रमेणानुष्ठानम् । शास्त्रे यथा । **विप्रतिषेधे परं कार्यम्**[11] । **पूर्वत्रासिद्धम्**[12] इति च । अत्र हि शास्त्रपाठ-मेवापेक्ष्येदं पूर्वमिदं परमिति व्यवस्थाप्यते ।

काण्डक्रमो यथा । येनैव क्रमेण ब्राह्मणक्षत्रियविशां वर्णसमाचारप्रतिपादकानि प्रकरणान्यु-द्दिष्टानि तेनैवाभिधीयन्त इति । वेदे तु कुत्र चिदङ्गे कर्मणि येनैव कण्डिकाक्रमेण कर्माणि चोद्यन्ते

1. अत्र वाक्यादेरामन्त्रितस्यासूयासंमतिकोप-कुत्सनभर्त्सनेषु ८।१।८॥ इति पाणिनीयं सूत्रं मूलम् ।
2. °नेकप्रकारः—का०
3. तै० सं० ६।३।१०।४॥
4. पा० ३।४।८२॥
5. पा० १।३।१०॥
6. मृग्यम्.
7. इदं नास्ति—का०
8. भामहकाव्यालङ्कारे २।९०॥
9. पद्मेन्दुभृङ्गमातङ्ग°, °वाणीवालैस्त्वया इति भामहे पाठान्तरे ।
10. तै० सं० २।६।१॥
11. पा० १।४।२॥
12. पा० ८।२।१॥
13. विज्ञाते—का० अयं च नितरां प्रमाद-पठितः पाठः ।

तेनैव क्रमेण प्रवर्तन्ते । यथा याज्यानुवाक्यानामाग्नेयादीनां च । अत्र येनैव क्रमेण याज्यानुवाक्यानां सन्निवेशः तेनैव क्रमेणाग्नेयादीनां संनिवेशात्काण्डक्रमेण सम्बन्धः । शास्त्रे यथा । द्विर्वचनकाण्डा-त्सम्प्रसारणकाण्डमिति[1] । तदेव विप्रतिषेधे सति पूर्वं भवतीति ।

प्रवृत्तिक्रमो यथा । येनैव क्रमेण ब्राह्मणाः समानाः प्रविशन्ति तेनैव क्रमेण यथास्वं चोदितं कार्यं प्रतिलभन्त इति । वेदे यथा । **सप्तदश प्राजापत्यान्पशूनालभेत**[4] इत्यत्र सप्तदशानामजानां प्रोक्षणविशसनपर्यग्निकरणानि क्रमेण चोदितानि । अनुष्ठातुः पुनरिच्छावशात्तेषु प्रवर्तमानस्य यत एवारभ्य पशोस्तेनानुष्ठात्रा तेषामाद्यस्यानुष्ठानमारब्धं तेनैव प्रवृत्तिक्रमेण पुनरपरयोरप्यनुष्ठानं विधत्त इति सोयं प्रतिपत्तुरिच्छावशात्प्रवृत्तः क्रमः प्रवृत्तिक्रम इत्युच्यते । शास्त्रे यथा । भाष्य उक्तम्—**यथैवानुपूर्व्याऽर्थानां प्रादुर्भावः तथैव शब्दानामपि**[5] । यथा पट्व्या मृद्व्येत्यत्र प्रथमं लिङ्गस-म्बन्धात् स्त्रीप्रत्यय उत्पद्यते तदनु कर्मसंख्यादिसम्बन्धादेकवचनमुत्पद्यते । तथैव च यणादेशादि कार्यं तेनैव क्रमेण प्रवर्तत इति ।

प्रतिपत्तिक्रमो यथा । **लुङ्लङ्लृङ्क्ष्वडुदात्तः**[7] इत्यत्र यद्यपि प्रयोगे पूर्वमडागम उच्चार्यते तथापि वयं विधिवाक्यार्थं प्रतिपद्यमाना लुङादीन् प्रतिपद्यामहे पश्चादडागममिति शास्त्रीयमुदाहरणम् लोके यथा । पुरुषो राज्ञ इत्युक्तेऽप्युच्चारणक्रममतिक्रम्य राजार्थव्यवच्छेदेनैव पुरुषस्य प्रतिपत्तिः । वेदे यथा । प्रधानयागाः पूर्वमुक्ता अप्यवान्तरयागनिर्वर्तनानुसारेणैव प्रतिपत्तिमुपारोहन्ति । यथा दीक्षणी-यादीनां सोमस्य च । अत्र हि सोमयागस्य प्रधानस्य पूर्वं बुद्ध्युपारोहेऽपि दीक्षणीयादियागनिर्वर्तन-पूर्वकमेव सोमप्रतिपत्तिः ।

प्रयोगक्रमस्तु यथा । डुकृञित्यादौ यथानुपूर्व्या अनुबन्धाः प्रयुक्तास्तथैवेत्संज्ञां लभन्त इति शास्त्रीयमुदाहरणम् । वेदे यथा । **दर्शपूर्णमासाभ्यामिष्ट्वाऽन्येन यजेत** इत्यत्र दर्शपूर्णमासयागपूर्व-कमन्यानुष्ठानं निर्ज्ञेयम् ।

बुद्धिक्रमो यथा । शास्त्रे वर्णानाम् **इको यणचि**[9] इत्यादौ बुद्ध्या पौर्वापर्यं कल्प्यते । तथा च **पौर्वापर्यमकालव्यपेतं संहिता चेत्पूर्वपराभावादसंहितम्**[10] । **एकवर्णवर्तित्वाद्वाचः उच्चरितप्रध्वंसि-त्वाच्च वर्णानाम्**[11] इत्याशङ्क्योक्तं भाष्यकारेण—

1. षष्ठाध्यायस्यादितः पा० ६।१।१२॥ इत्यन्तं द्विर्वचनकाण्डम् । तत ऊर्ध्वं ६।१।४४॥ इत्यन्तं सम्प्रसारणकाण्डम् ।
2. येन—का०.
3. °न्नूपरान्—ख.
4. तै० ब्रा० १।३।४।३॥ तत्र आलभते इति पाठः ।
5. १।१।५७॥ आरभ्यमाणे नित्योऽसावि त्यादिश्लोकवार्तिकव्याख्यायाम् ।
6. प्रत्ययः—ख १३, का०, अ.
7. पा० ६।४।७१॥
8. का० श्रौ० ७।१॥ अत सूत्रेऽन्ते इतिशब्दे-रिति पदे अनुषक्ते । भाष्यकृत्कस्तु देवरथौ वा एतौ यज्ञस्य यद्दर्शपूर्णमासौ । स य एताभ्यामिष्ट्वाथान्येन यजते इत्यादिकां श्रुतिं ( ) प्रमाणयति ।
9. पा० ६।१।७७॥
10. पा० महा० भा० १।४।१०९॥ वा० ९.
11. पा० महा० भा० १।४।१०९॥ वा० १०. अत्र भाष्यपरिष्कर्त्रा कील्हार्नमहाशयेन पूर्वापराभावात्, एकैकवर्णवर्तित्वात् इति पाठद्वयं पुण्यराजेनोपात्तयोः पाठयोर्भाष्य-कोशेषु सतोः परिगृहीतमिति कारणेनात्र भवितव्यम् । मन्ये पुण्यराजटीका तेन नालोकितेति ।

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वनीतिः ।
शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यम् ॥[4]

इति शास्त्रे बुद्धिक्रमः । लोकेपि विद्युतः क्रमेण प्रवृत्ता बुद्धौ संकलयति[5] । वेदे प्रयाजादीनामुत्पन्नप्रध्वंसिनां बुद्ध्यैव संकलनमिति बौद्धः क्रमः । सर्व एव वा बौद्धः क्रमो न वस्तुसमुत्थ इति । यदाहुः—प्रतिपत्तिक्रमो न वस्तुसमुत्थः[6] इति ।

अथ एषां क्रमाणां बलाबलचिन्तां करोति । क्रमोयमत्र बलवान् इति । यथा वेदे । प्रथमं भोजयितव्यस्ततोऽभ्यञ्जनम् इति । अथ क्रमप्रतियोगिनं दर्शयितुमाह—अस्मिंस्तु न विवक्षितः इति । क्रम इति प्रकृतम् । अविवक्षा क्रमस्य प्रतिपक्षः । तद्यथा । वेदेऽनुष्ठातॄणां क्रमाविवक्षा निमित्तवशाद्दृश्यते । लोके प्रतिपत्तॄणामपि दृश्यते । शास्त्रे यथोक्तं वार्तिककृता—अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति[7] इत्यादि ॥८१॥

अथ प्रयोजकाप्रयोजके निदर्श्येते ।

इदं पराङ्गैः सम्बद्धमङ्गानामप्रयोजकम् ।
प्रयोजकमिदं तेषामत्रेदं नान्तरीयकम् ॥ इति

तत्र राजा छत्रच्छायायाः प्रयोजकः, हस्त्यादयस्तदाधारा अप्रयोजका अपि च्छत्रच्छायया संबध्यमानाः प्रयोजका उच्यन्त इत्येकफलतया प्रयोजकभावः । फलभेदेप्यूह्यमुदाहरणमिति लोके । वेदशास्त्रयोरप्यूह्यम् ॥८२॥

अथ शेषिशेषौ दर्शयितुमाह—इदं प्रधानं शेषोयम् इति । वेदे यथा । व्रीहीनवहन्ति[8] इति व्रीहयः शेषि । अवघातः शेषस्तदर्थत्वात् । लोकशास्त्रयोरूह्यमुदाहरणम् । अस्यैव शेषिशेषभावस्येतिकर्तव्यतां प्रदर्शयितुमाह—विनियोगक्रमस्तथा[9] इति । तदेवं गुणप्रधानभावस्य परिकरबन्धसहितस्योपदर्शनं कृत्वा तत्रैवावान्तरभेदमाह—

साक्षाद्धस्योपकारीदमिदमाराद्विशेषकम् । इति ।

तत्र लोके साक्षादुपकारकं यथा स्नात्मन्यलङ्कारादि । आरात्तदेव पुत्रदारादिषु । शास्त्रेपि साक्षादुपकारकं प्रत्ययस्य प्रकृत्यादि । यत्तु प्रकृत्यादेर्विशेषणं तदारादुपकारकम् । यथा धुरचे[11] इत्यादाविवर्णान्तत्वादि धातोर्विशेषणम् । कर्तृविशेषणं च पक्वादीति । वेदेप्यवघातादि दर्शपूर्णमासयोः साक्षादङ्गं प्रयाजादिकं त्वारादुपकारकम् ॥८३॥

इत्येवं सप्रभेदं सपरिकरबन्धं शेषशेषिभावमुपदर्श्येदानीं भेदं प्रदर्शयितुमाह—शक्तिव्यापारभेदेऽस्मिन्[12] इति । शक्तिव्यापारभेदाश्रयणेन बहुविधो भेदो लक्ष्यते । तत्र लोके बलाहकाद्विद्योतते बलाहको विद्योतत इत्यत्र बलाहकस्यापादानाधिकरणकर्तृशक्तीनां भेदः । शास्त्रे चात्रैव विवक्षावशात्

१. वक्ता—अ, का०.
२. तद्वर्तीतिः—अ, का०.
३ शब्दानर्था०—अ, का०.
४. पा० महा० भा० १।४।१०९॥
५. मृग्यम् ।
६. इदं मृग्यम्.
७. पा० महा० भा० १।३।१०॥ वा ८॥
८. फलभेदेपीत्थमु°—ड १.
९. इदं मृग्यम्.
१०. आराच्च तदेव—अ.
११. पा० ३।३।५६॥
१२. भारदु°—अ.

व्यापारभेदेपि शक्तिव्यापारभेदः [illegible] न तु व्यापारभेदः । यथा धनुषा विध्यतीति । अत्र हि गर्भीकृतापादानशक्तिः करणशक्तिर्विवक्षयाभेदेन व्याप्रियते । न [illegible] धनुषः करणत्वं संभवति । अत एवात्र संज्ञयोर्विप्रतिषेधो वर्ण्यते । व्यापारभेदस्तु बुद्धौ न संभवति । शक्तिभेदमन्तरेण व्यापारभेदस्यासंभवात् ।

अथ फलभेदेन भेदमाह—फलमत्र तु भिद्यते इति । यथैकस्य दानस्यायुरारोग्यैश्वर्याणि भिन्नानि फलानि । अन्ये त्वायुःप्रभृतिषु सत्सु प्रीतिविशेषमेवैकं फलमाहुः । तथा बह्वीनां क्रियाणामेकं फलं यथा व्यवहारदर्शने प्रज्ञानामेको निर्णयः । यथा वक्ष्यति—

भिन्नव्यापाररूपाणां व्यवहारादिदर्शने ।
कर्तॄणां दर्शनं भिन्नं संभूयार्थस्य साधकम् ॥[3] इति ।

प्रकारान्तरेणापि भेदं दर्शयितुमाह—सम्बन्धाज्जातभेदोयम् इति । यथाख्यातेषु धातूपात्तायाः क्रियायाः प्रत्ययवाच्यकर्तृभेदे सति सम्बन्धात् क्रियाया अपि भेदः प्रतीयते । पचतः पचन्तीति । यथोक्तम्—साधनभेदाच्चिह्नेषु फलाभावात्फलं भवत्येवावबोधश्चेत्साधनेभ्यः प्रसिद्धोऽसौ[4] इति ।

इदानीमस्यैव प्रतिपक्षभूतमभेदं दर्शयितुमाह—भेदस्तत्रावविवक्षितः इति । अत्र शक्त्यभेदो यथा । समानकर्तृकयो[5]: इत्यत्र पक्त्वौदनं भुङ्क्त इति कर्तृकर्मणोः क्रियाभेदेन प्राप्तः शक्तिभेदो वक्ता न विवक्षितः । तथा च सत्यत्र समानकर्तृकत्वमुपपन्नं भवति । व्यापाराभेदः प्रागेव दर्शितो धनुषा[1] विध्यतीत्यत्र । फलभेदोपि पूर्वमुक्त एव । यथा दानस्यैका प्रीतिः फलमिति केचिदिति । सम्बन्धाज्जातभेदत्वस्य प्रतिपक्षो यत्र न सम्बन्धभेदाज्जातभेदत्वम् । यथास्ते देवदत्तेनेत्यत्र भावे लकार उत्पन्नः साधनभेदानुपादानान्न क्रियाभेदमपि गमयितुं न शक्नोति । देवदत्तेनेत्यस्मात्तत्प्रतीतिरिति चेदेकपदापेक्षयैतदुक्तमस्माभिरित्यदोषः ।

तदेवं शक्त्यादिभेदेन बहुविधोऽयं भेद इति लक्ष्यैः स्वयमेवोत्प्रेक्ष्यः । तथा तत्प्रतिपक्षभूतस्तद्वदभेदोपि बहुविध एव विज्ञेयः । अनयोश्च भेदाभेदयोः क्व चिद्वास्तवत्वं क्व चिद्विवक्षामात्रशरणत्वम् । विवक्षापि क्व चिल्लौकिकी । क्वचित्प्रायोक्तीत्येतदप्यत्रानुसर्तव्यमिति । वेदेपि भेदव्यवहारो दृश्यते । यजते ददाति जुहोतीत्यादौ यागदानहोमरूपादनुबन्धभेदादपूर्वस्य भेदः । अभेदोपि यथा । षण्णामप्याग्नेयादियागानामेकस्मिन्नेवापूर्वे साध्ये ऐक्यमिष्यत इति । एवं षड् द्वादश चतुर्विंशतिश्च लक्षणानि प्राकृतानि वैकृतानि च सप्रतिपक्षाणि दर्शितानि ॥८४॥

इदानीं षड्द्वादशचतुर्विंशतिव्यतिरिक्ता अप्यमी बहुप्रकारा न्यायाः पदार्थनिश्चयहेतवः सन्तीति प्रौढवादितया टीकाकारः प्रदर्शयितुमाह—

प्रसज्यप्रतिषेधोऽयं पर्युदासोऽयमत्र तु ।
इदं गौणमिदं मुख्यं व्यापीदं गुरुलघ्विदम् ॥८५॥

१. °धनुषा— अ.
२. त्वायुष्य°—का०
३. वा० प० २।३७९॥
४. इदं नास्ति—ड.
५. अत्र रागतिरपि बुद्धेरथा कुतारत्वमिदमिति तु दूरमपेतम् ।
६. पा० ३।४।२१॥
७. °रैकात्मप्रतीति°—का.
८. क्वचित्—का.

भेदेनाङ्गाङ्गिभावोऽस्य[1] बहुधेदं[2] विकल्प्यते ।
इदं नियम्यतेऽस्यात्र योग्यत्वमुपजायते ॥८६॥
अस्य वाक्यान्तरे दृष्टाल्लिङ्गाद्[3]भेदोनुमीयते ।
अयं शब्दादपोद्धृत्य[4] पदार्थः प्रविभज्यते ॥८७॥
इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः ।
सर्वे[5] ते[5] न प्रकल्पेरन्[6] पदं चेत्स्यादवाचकम् ॥८८॥

तत्र **प्रसज्यप्रतिषेधोयम्** इति । यत्र क्रियापदेन नञः सम्बन्धो वाक्यभेदश्च । शास्त्रे यथा । **अकर्तरि च कारके**[7] इति । वेदे[8] यथा । **ब्राह्मणो न हन्तव्यः । नानृतं वदेत्**[9] इत्यादि । लोके यथा । असूर्यंपश्या राजदारा इति । **पर्युदासोयमत्र तु** इति पर्युदासः खलु प्रसज्य प्रतिषेधविपरीतस्तत्र व्याख्यातेने[11] नैव[11] नञः सम्बन्ध एकवाक्यता च । उक्तं च—

नामधात्वर्थयोगी[12] **तु**[12] **नैव नञ् प्रतिषेधकः**[13] । इति ।

तत्र शास्त्रे यथा । **आतोनुपसर्गे कः**[14] इति । वेदे यथा । **अब्राह्मणः सोमविक्रयी**[15] इत्यत्र जातिमात्रानुगमेन ब्राह्मणसदृशस्य कस्य चिदेव प्रतिपत्तिः । यथा च **नोद्यन्तमादित्यमीक्षेत**[16] इत्येवमादि स्मार्त्तमुदाहरणमदूरविप्रकर्षादत्र वैदिकमेव । लोके यथा । अब्राह्मणमानयेति । **इदं गौणम्** इति । शास्त्रे यथा । **तत्पुरुषः समानाधिकरणः**[17] इति । अत्रावयवानां समानाधिकरणत्वात्तत्पुरुषस्यापि

१. भेदो नाङ्ग°—ग ३. ४.
२. बहुभेदं–ख, टीकाकोशाः. एतत्पाठपरिग्रहे नेगकाङ्क्ष्यं न भवति किं तद्यद्विकल्प्यत इति ।
३. दृष्टो लि°—क १.२.५.
४. शब्दरपो°—क १.२.५.७, ग १.३.४.
५. ते न सर्वे—ग १.३.४.
६. प्रकल्प्येरन्—ग १.४.
७. पा० ३।३।१९॥
८. महाभाष्ये तु धर्मशास्त्रं च तथा(१।२।६४॥ ३९॥) इति वार्तिकव्याख्यानावसरे संगृहीतम् ।
९. तै० सं० २।५।१॥
१०. प्रसज्यप्रतिषेधस्य पर्युदासस्य च विवेको भाष्यटीकायां हरिणा प्रदर्शितः यथा— यद्यपि प्रसज्यप्रतिषेधे पर्युदासे चोभयत्राप्राप्त्यनुमानम्, अयं तु विशेषः । प्रसज्यप्रतिषेधे विच्छेदोपक्रमा प्रवृत्तिः । पर्युदासे तु विशिष्टमेव विप्रतिपद्यमानो विच्छेदोपक्रमं प्रतिपद्यते । पृ० १६८ क.
११. व्याख्यानेनैव—ज, का०. अयं च दुष्टः पाठो लक्षणदोषात् ।
१२. °योगेन—ख.
१३. मी० श्लो० वा० अपोहवादे त्रयस्त्रिंशस्य श्लोकस्य पूर्वार्धः ।
१४. पा० ३।२।३॥
१५. मृग्यम्.
१६. वा० ध० सू० १२।१०॥ तत्र पश्येत् इति पाठभेदः ।
१७. पा० १।२।४२॥

समानाधिकरणत्वम् । वेदे यथा । **आदित्यो यूपः, यजमानः प्रस्तरः** इति । **अत्र गुणाभावकत्वाद्**[1]यूपादिरप्यादित्यादिरित्युच्यते । लोके च सिंहो माणवकः, गङ्गायां घोष इत्यादि । **इदं मुख्यम्** इति । अत्र[4] शास्त्रे यथा । धातोः प्रातिपदिकादित्यादावभिधेयस्य मुख्यत्वम् । वेदे यथा । **यजमानोध्वर्युमन्वालभते**[5] इत्यत्राध्वर्युयजमानौ मुख्यावेव । लोके यथा । शृङ्गे माणवक इति । **व्यापीदम्** इति । शास्त्रे यथा । **एकश्रुति दूरात्संबुद्धौ**[6] इति । तत्र हि लौकिक्याः सम्बुद्धेर्ग्रहणं व्यापित्वात् । तद्ग्रहणे हि शास्त्रीयापि संबुद्धिः परिगृहीता भवति । वक्ष्यति च—

विषयं कृत्रिमस्यापि लौकिकः क्वचिदुच्चरन् ।
व्याप्नोति दूरात्सम्बुद्धौ तथा च ग्रहणं द्वयोः ॥[7] इति ।

यावत्सु चोभयानुग्रहस्तत्र सर्वमनुगन्तव्यं व्यापित्वेनेति । वेदेपि **सर्वे प्रधानयागाविषया ज्योतिष्टोमेन**[8] इत्याद्यधिकारविधयः । लोकेपि यथा । कयाचिदितिकर्तव्यतया संनिहत्याममरसिन्धुस्नानम्[9] । यदुच्यते—

उपोष्य रजनीमेकां संनिहत्यां नरोत्तमः ।
सौर्ये तमसि गङ्गायां चान्द्रे चापि विमुच्यते ॥[10] इति ।

अत्र सकृदेव स्नानात्त्रैलोक्याभ्यन्तरगतसर्वतीर्थस्नानमिति व्याप्युदाहरणं प्रसङ्गादुक्तम् । **गुरुलघ्विदमिति** । तत्र शास्त्रे यथा । **पृषोदरादीनि यथोपदिष्टम्**[11] इति शिष्टप्रसिद्धसाधुशब्दौघप्रतिपादने लघुरुपायः । स एव तु प्रातिपदिकादनभिहितकर्मादिगतैकत्वादौ स्वादय इत्यादिना गुरुः[12] । लोकेपि लोहितशालिमानयं ग्राम इत्यादिवचनव्यक्तिषु कर्मधारयमत्वर्थीययोरेकत्र क्रियमाणयोः गुरुः प्रक्रम[13] उपजायते लघुत्वं तु प्रक्रमस्य बहुव्रीहेस्तत्रेवेति[14] । वेदे तु गुरुलाघवव्यवहारस्तन्त्रप्रसङ्गावृत्तिषु । तत्रावृत्तौ गुरुः प्रक्रमो[15] यथा । **त्रिः प्रथमामन्वाह त्रिरुत्तमाम्**[16] इति । तन्त्रप्रसङ्गयोस्तु लाघवव्यवहारो यथा निदर्शितं प्रागिति ॥८५॥

१. तै० ब्रा० २।१।५।२॥
२. तै० सं० १।७।४।४॥, तै० ब्रा० ३।३।९।२॥
३. °यूपादिरादित्या°—ज.
४. तत्र—ज.
५. श० ब्रा० ३।६।२।९॥ इत्यत्र श्रूयते— तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते, प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमानः ।
६. पा० १।२।३३॥
७. वा० प० २।३॥
८. इदमन्वेष्यम्.
९. संनिहत्याममर°–का०, संनिहत्यमर°—छ२. संनिहती नाम तीर्थः । अयं च शब्दो महाभारते इत्थं व्युत्पाद्यते—
मासि मासि नरव्याघ्र संनिहत्यां न संशयः।
तीर्थसंनिहनादेव संनिहत्येति विश्रुता ॥
वनपर्व० अ० ८१. श्लो०१९५.
१०. मृग्यम्.
११. पा० ६।३।१०९॥
१२. इत्यस्मादनन्तरम् उपाय इत्यधिकम्—ज
१३. गुरुक्रमः—ज.
१४. बहुव्रीहिस्—छ, का०.
१५. क्रमो—छ १.
१६. तै० सं० २।५।७॥

एतत्सर्वं यथोक्तमस्मत्पक्षे न विरुध्यते। तथाचास्मत्पक्षे अविभक्ते निर्विभागे वाक्यार्थे एकस्मिन्नपि[1] तस्मिन्पानकरसादिवत्समाश्रीयमाणे शक्तिभेदसमाश्रयणेन चापोद्धृते कृतापोद्धारे सत्यवान्तरवाक्यार्थोपजननात्सर्वमेतत् सिद्ध्यतीति तात्पर्यम्।

यथा शाक्यदर्शने निर्विभागमेकमेव सकलत्रैलोक्यविलक्षणं सत्त्वं स्वलक्षणमभ्युपगम्यते। तत्तदितरपदार्थव्यावृत्तिसमाश्रयणेन च जात्यादिव्यवहारः कश्चिन्निर्वाह्यते तथैवाखण्डवाक्यवादिना शक्तिभेदाद्वाक्यार्थप्रविभागे कृते सर्वं युज्यत इति न कश्चिद्दोषः

वाक्यान्तरविभागेनाविभक्तेऽपि वाक्यार्थे इति च वाक्यवाक्यार्थयोरेकयोगक्षेमत्वादुक्तम्। पदार्थासम्भवपूर्वके चोद्ये वाक्यान्तरविभागेन इत्युत्तरमसमीचीनमिव लक्ष्यत इति चेत्—बाध्यबाधकभावादिन्यायो वाक्येष्वपि दृश्यते। ततो महावाक्यापेक्षयावान्तरवाक्योपप्लावनेन तदपि न विरुध्यत इत्युपदर्शितम्। तदुपदर्शनेन परिमितपरिमाणेऽपि वाक्ये पदार्थापोद्धारनिबन्धना अप्येते न्यायाः सम्भवन्तीत्युपदर्शितमेव भवति ॥८९॥

एतदेव प्रसिद्धदृष्टान्तोपदर्शनेन द्रढयितुमाह—

यथैवैकस्य गन्धस्य भेदेन परिकल्पना।
पुष्पादिषु तथा वाक्येष्वर्थभेदो विधीयते ॥९०॥

स्रक्चन्दनादावेक उपसंनिविष्ट एव गन्धः। तस्य त्वपोद्धारसमाश्रयणेन भेदः कल्प्यतेऽयं पुष्पगन्धोऽयं चन्दनगन्ध इत्यादि। तथा वाक्य एवार्थापोद्धारसमाश्रयणेन पदार्थभेद उपपाद्यते अयं देवदत्तपदार्थोऽयङ्गोपदार्थ इत्यादि ॥९०॥

दृष्टान्तान्तरमाह—

गवये नरसिंहे वाप्येकज्ञानावृते यथा।
भागं जात्यन्तरस्यैव सदृशं प्रतिपद्यते ॥९१॥

एकज्ञानेनाभिन्नेनावृते विषयीकृते परिच्छिन्ने गवयादौ सति तदेकदेशं प्रसिद्धं जात्यन्तरस्यैव प्रतिपद्यते। एवमपोद्धारसमाश्रयणेन सर्वन्यायसमर्थने कृते तत्समानयोगक्षेमतया प्रतिनिधिः श्रुतिवाक्यविरोधश्च समर्थित एव। अग्रे त्ववान्तरवाक्यानामर्थवत्त्वं समर्थयिष्यते ॥९१॥

अधुना तमेवापोद्धारमाश्रित्य पिकादिसन्देहे[10] चोद्यमुपसंहर्तुं प्रस्तावनां करोति—

१. एकस्मिन्°—का०.
२. निर्विभागमेव—का०.
३. लक्षणम्—छ १.
४. °पप्लवनेन—छ.
५. ऽभिधीयते—ख, ग १.३.४, टीकाकोशाः. परं नेदं जाघटीति। एतस्य परिकल्पनायां कर्मण्यन्वयायोगात्। इदं नाम साधीयो यत् परिकल्पना विधीयत इति। टीकाकोशेष्वपि लेखकप्रमादजमेतत्प्रतिभाति। टीकायामस्यापठितत्वाद् उपपाद्यते इत्येवं विवृतत्वाच्च।
६. उपपद्यते—का०. तच्चायुक्तम्।
७. °ज्ञानादृते—क १.२। °ज्ञानकृते—ग१.३.४
८. °भिन्नेनावृते—ञ.
९. स्तुतिवाक्य°—का. इदं चातीवानुपपन्नम्। अहो अस्यार्थवैधुर्यमपि नेक्षितं काशिकेन सम्पादकेन।
१०. संदेह°—ज.

अप्रसिद्धं तु यं[1] भागमदृष्टमनुपश्यति।
तावत्संसविदं[2] मूढः सर्वत्र प्रतिपद्यते ॥९२॥

तत्र च गवयादौ भागमप्रसिद्धमदृष्टमनिश्चितमनुपश्यति मूढः। परमार्थतस्तु संवित्तस्य सर्वत्र निर्विभागे तस्मिन् कुतश्चित्कारणान्नोत्पन्ना। सर्वत्रायमसंविदं तावत्पुनः प्रतिपद्यत इति ॥९२॥

प्रकृते योजयितुमाह—

तथा पिकादियोगेन वाक्येऽसन्तविलक्षणे।
सदृशस्येवं[3] संज्ञानमसतोऽर्थस्य मन्यते ॥९३॥

वनात्पिक आनीयतामित्येतद्वनाद्वृक्ष आनीयतामित्येतस्माद्वाक्यान्तरादत्यन्तविलक्षणमेव। वनादानीयतामिति चात्रासन्नेवार्थो वनाद्वृक्ष आनीयतामित्यस्य क्रमवशात् सदृश इति मन्यते। परमार्थतस्तु पिकादियोगात्सकलमेवात्यन्तविलक्षणम्। एकपदार्थसन्देहे सकलमेवाज्ञातं वाक्यमित्युच्यते ॥९३॥

दृष्टान्तमाह—

एकस्य भागे सादृश्यं भागे भेदश्च लक्ष्यते।
निर्भागस्य प्रकाशस्य[6] निर्भागेनैव चेतसा ॥९४॥

यथैकमेव नीलपीतादिज्ञानं प्रकाशस्वभावं[7] निरंशमेवोपजातम्। तस्य ज्ञानत्वेन सादृश्यं मन्यते। नीलपीतादिना च भेदः। वस्तुतः पुनर्भिन्नमेव नीलज्ञानं पीतज्ञानादिति न तत्रानुगमः कश्चित्। अथवा चित्रज्ञानयोरेव भागे सादृश्यं भागे भेदं प्रतिपद्यते। किं चिच्चि चित्रज्ञानं नीलहरितोल्लेखि। किं चिच्चि नीलपीतोल्लेखीति नीलादिना तत्र[8] सादृश्यं हरितादिना भेदं प्रतिपद्यत इति ॥९४॥

दार्ष्टान्तिके योजयितुमाह—

तथैव भागे सादृश्यं भागे भेदोऽवसीयते।
भागाभावेऽपि वाक्यानामत्यन्तं भिन्नधर्मणाम् ॥९५॥

प्रतीतार्थः श्लोकः ॥९५॥

इदानीमखण्डवादी पदवादिनं दूषयितुमाह—

१. यद्—ख, का०, टीकाःकोशाः.
२. तावत्त्वसंविदं—ख, का०, टीकाकोशाः. अत्र तुशब्देन किं व्यावर्त्यत इति श्रुत्या नोक्तम्। किं च। तावतः पुनरर्थेऽव्ययस्य परिग्रहे यदिति पूर्वाधिगत केन सम्बध्येत। यत्तदोर्नित्यः सम्बन्ध इति व्यवस्थितम्। तावत्यसंविदन्—ग ४. इदमशुद्धम्। तावत्यसंविदान इत्येव साधु।
३. सदृशस्यव—छ २. ७,
४. स ज्ञान°—ग ३.४.
५. इत्येतदधोऽधः प्रत्ययस्य इति संनिवेशयति—छ ३.
६. तेजसा—क १.२.५.७.
७. प्रकाशस्वभावात्—ज.
८. तत्—ज.

अवान्तरवाक्योपप्लावनेनैतदुभयार्थप्रत्यायकं भविष्यतीति दृष्टान्तेन प्रदर्शयितुमाह—

ऊ इत्येतदभिन्नं च भिन्नवाक्यनिबन्धनम् ।
भेदेन ग्रहणं चास्य पररूपमिव द्वयोः ॥१०२॥

ऊकाल इत्येतदुपात्तम् । तद्ध्रस्वदीर्घप्लुतानां त्रयाणां सामान्येनाभिन्नं रूपं बोद्धव्यम् । ततश्चैतदेकं ग्रहणकवाक्यस्थानीयमवान्तरवाक्यनिबन्धनं भवतीत्याह—**भिन्नवाक्यनिबन्धनम्** इति । उकालोऽज्झ्रस्वसंज्ञः । ऊकालो दीर्घसंज्ञः । ऊ३कालः प्लुतसंज्ञो बोद्धव्य इति । अतश्च यदा संसृष्टत्वादस्याभेदेनैव ग्रहणं प्रत्यायके स्थितं तदा ऊ इत्येतद्रूपं भिन्नवाक्यनिबन्धनमेव भवति । यथा पररूपं संसृष्टत्वादेकमपि द्वयोः प्रत्यायकं दृश्यते तथैतद्बोद्धव्यम् । ततश्च श्वेतो धावतीत्यादाववान्तरवाक्योपप्लावनेनोभयार्थता भविष्यतीति योजनीयम् ॥१०२॥

शब्दानां भेदपक्ष एव वार्तिककारस्याभिरुचित इति दर्शयितुमाह—

प्लुतस्याङ्गविवृद्धिं च समाहारमचोस्तथा ।
व्युदस्यता पुनर्भेदः शब्देष्वत्यन्तमाश्रितः ॥१०३॥

प्लुतावैच इदुतौ[2] इत्यत्रोक्तम्—**अङ्गविवृद्धिर्नोपपद्यते** । न ह्यैचोऽवयवोऽकार इकार उकारो वा इत्येवमङ्गविवृद्धिं व्युदस्यता तावेव शब्दावेकत्र संमिलिताविति यः उपदर्शितः प्रागभेदः स परकृतः । तथाऽचोः समाहारं व्युदस्यता भेद एवेष्यत इति यदाह—**समाहारोऽचोश्चेन्नाभावाद्** इति । तस्मात् श्वेतो धावतीत्यादौ सदृशयोर्मेलनमनुपदमवान्तरवाक्योपप्लावनेन, तन्त्रन्यायसमाश्रयणेन वा समर्थनं तज्ज्याय इति ॥१०३॥

अथ तन्त्रमुपसंहर्तुमुपक्रमते—

अर्धर्चादिषु शब्देषु रूपभेदः क्रमाद्यथा ।
तन्त्रात्तथैकशब्दत्वे भिन्नानां श्रुतिरन्यथा ॥१०४॥

यथा क्रमवशेन अर्धर्चोद्धम् अर्धर्च इति एकस्यैव शब्दस्य रूपभेदस्तथा तन्त्रन्यायाश्रयणेनैकशब्दत्वे भिन्नानां रूपाणामन्यथा श्रुतिरभिन्ना श्रुतिर्बोद्धव्येति तन्त्रमुपसंहृतम् ॥१०४॥

१. यस—क १.२.५.७, ग १.३.४.
२. पा० ८।२।१०६॥
३. इदं भाष्ये एतयानुपूर्व्या नोपलभ्यते । इदमर्थत उद्धरणम् ।
४. इति नास्ति—का०. अत्र परिष्कर्तैवापराध्यति ।
५. पा० महा० भा० १।२।३१॥१ वा० ॥
६. न ज्यायः-ज. पौर्वापर्यपरामर्शेनास्यासाधुत्वमभिव्यज्यते । वार्तिककारीयं मतं व्याख्याय तदेव चाङ्गीकारपूर्वकं हेतूकृत्य पूर्वोक्तस्य समर्थनस्य ज्यायस्त्वं कथं प्रतिषेधेत् । अतस्तदप्रतिषेधनमेव न्याय्यम् तदिति पाठेपि न नो बह्वी रुचिः । यदि तच्छब्द उपेक्ष्येत नार्थो मनागपि हीयेत ।
७. क्रमो यथा—क १.२.५.७.
८. अर्धोद्धम्—का०. अनर्थकः पाठः ।

एतदेव स्फुटीकर्तुमाह—

संहिताविषये[1] **वर्णाः स्वरूपेणाविकारिणः ।**
शब्दान्तरत्वं यान्तीव शक्त्यन्तरपरिग्रहात् ॥१०५॥

स एव शब्दोऽनेकशक्तिवर्णतया संहिताविषये प्रतिभासत इत्येकस्यैव श्वेतशब्दस्य संहितयोच्चारणाच्छक्त्यन्तरपरिग्रहेणोभयार्थप्रत्यायकत्वं मन्यते ॥१०५॥

एकस्यापि निमित्तभेदाद्भेद उपजायत इति दृष्टान्तप्रदर्शनेनाह—

इन्द्रियादिविकारेण दृष्टं ग्राह्येषु वस्तुषु ।
आत्मत्यागादृते भिन्नं[2] **ग्रहणं स**[3] **क्रमः श्रुतौ ॥१०६॥**

यथा काचाद्युपहतचक्षुषामेकाकारमपि वस्तु नानारूपतयावभासते तथा संहितावशादेकोपि शब्दो रूपान्तरेणावभासते ॥१०६॥

एतदेवोपसंहर्तुमाह—

अभिधानक्रियायोगाच्छब्देष्ववि[4]**कृतेष्वपि ।**
रूपमत्यन्तभेदेन तदेवैकं[6] **प्रकाशते ॥१०७॥**

अभिधानक्रिया संहितयोच्चारणमेव । तया योगात्तत्सम्बन्धादविकृतेष्वपि शब्देष्वेकमेव शक्त्यन्तरपरिग्रहादत्यन्तभेदेन प्रकाशते ॥१०७॥

अथैतदेवागमविषये दृश्यते तेन संवादयितुमाह—

ऋचो[7] **वा गीतिमात्रं वा साम द्रव्यान्तरं न तु ।**
गीतिभेदाद्विगृह्यन्ते ता एव विकृता ऋचः ॥१०८॥

ऋच एव तथोदीरिताः सामाख्यां यथा प्रतिलभन्ते । विशेषेणोदीरणमात्रं वा साम । यथोच्यते—**गीतिषु सामाख्या** इति । ऋचो वा सामेत्येतत् ज्ञापयितुमाह— **गीतिभेदाद्** इत्यादि ।

तदेवं भेदाभेदविवक्षाभिन्नेन प्रत्याय्यप्रत्यायकभावेन अत्यन्तभेदरूपेण वा संहिताविषये

१. °विषया—ग १.३.४.
२. भिन्न—ज
३. सं—क १.२.५.७, ग १.३.४, छ १. अयुक्तः पाठः । किञ्चिद्यदन्यत्र वर्तमानमन्यत्र संक्रामति यथा तथा श्रुतौ शब्दे संहितावशाद् रूपनानात्वमित्यर्थसौलभ्येपि आत्मत्यागादृते इन्द्रियादिविकारेण ग्राह्येषु वस्तुषु भिन्नं ग्रहणं दृष्टमिति वाक्येऽन्वयदौर्लभ्यात्प्रायं पाठोऽभिरुचितोऽस्माकम् ।
४. °क्रियाभेदात्°—क १.२.५.७, ग १ ३.४., ज, का०.
५. °छब्देषु वि०—क १.२.५ ७, ख.
६. तदेवैकं—ग १.३.४ । तदेकत्वं—क १ ५.७ उभयः पाठोऽसमञ्जसः । तदेति श्रूयमाणे कदेत्याकाङ्क्षा भवति ।
७. ऋच्यध्यूढं साम गीयते इति हि छन्दोगा आमनन्ति ।
८. भेदात्तु गृह्यन्ते—ग १.३ ४.
९. जै० सू० २।१।३६॥

क्रियापदमाक्षिप्तसमस्तसाधनग्रामं निराकाङ्क्षं सम्पद्यते । क्रियापदानुपक्तः परस्परसम्बन्धो निराकाङ्क्षस्तस्मादुपपन्न इति न काचित् क्षतिः ॥११५॥

ननु चान्विताभिधानं न युक्तमिव प्रतिभाति । तथा हि यदि प्रथममेव सकलविशेषयुक्तो वाक्यार्थोऽवगतः स्यात् तदुत्तरकालभाविनां गवादीनामभिधाने न किंचित्प्रयोजनमुत्पश्यामः । अवगतार्थाना हि पदानां पुनर्वचने वैयर्थ्यमापद्यत इत्याशङ्क्य समर्थयितुमाह--

आवृत्तिरनुवादो वा पदार्थव्यक्तिकल्पने ।
प्रत्येकं तु समाप्तोऽर्थः सहभूतेषु वर्तते ॥११६॥

अवगतार्थानामप्यावृत्तिर्नियमाय भविष्यति । उक्तस्य वार्थस्य स्फुटीकरणायानुवादस्तेषामस्त्विति नास्त्यानर्थक्यम् । एवमपि पूर्वस्य पूर्वस्य तिरोहितत्वात्सहत्वासम्भवादन्वयस्यासम्भवादर्थानवगम एव । एकस्मादेव च पदात्समस्तविशेषान्वितस्य वाक्यार्थस्याप्रतीतेरुत्तरेषां चानवगतार्थानां नियमानुवादपरिकल्पनायोगादसमञ्जस एवान्विताभिधानपक्षः । यदा पुनः सहभूतेष्वेवासौ प्रत्येकं समाप्तोऽर्थ इत्युच्यते । यथोक्तम्—

व्यक्तोपव्यञ्जना[5] सिद्धिरर्थस्य प्रतिपत्तृषु ।[4] इति । तदा नास्त्येव सहभूतानामुपादाने वैफल्यमिति न कश्चिद्दोषः ॥११६॥

तदेवं सङ्घातादीन्युद्दिष्टानि प्रासङ्गिकविचारसहितानि व्याख्यातानि । आख्यातं वाक्यमिति दर्शयिष्यते । वाक्यव्याख्याप्रसङ्गेन च वाक्यार्था अपि संसर्गसंसृष्टिनिराकाङ्क्षपदार्थप्रयोजनलक्षणाश्चत्वार उपदर्शिताः । प्रतिभां क्रियां च दर्शयिष्यति ॥११६॥

नन्वेकस्यैव वाक्यार्थस्य कथं विकल्पप्रपञ्च इत्याशङ्क्य निरूपयितुमाह--

अविकल्पे[6]ऽपि[7] वाक्यार्थे विकल्पा भावनाश्रयाः ।

वाक्यार्थोऽविकल्प एव निर्विभाग एवाभ्युपगन्तुं युक्तः । तस्मिंश्च तथाभूतेऽपि येऽमी विकल्पास्ते पुरुषाणामनेकशास्त्रभावनासमाश्रया बोद्धव्याः । न वस्त्वनुपातिन इति । तद्वाक्यार्थ एक एव युक्तः ॥

एतदेव प्रतिपादयितुमाह—

अत्राधिकरणे वादाः[8] पूर्वेषां बहुधा गताः ॥११७॥

अस्मिन्नधिकरणे विचारस्थाने पूर्वेषामाचार्याणां प्रवादा बहुधा गताः शास्त्रसंस्कारवासितचेतसां तेषामिति कस्य पर्यनुयोगः क्रियते ॥११७॥

परमार्थतस्तु वाक्यार्थ एक एव, सर्वोऽपि शब्दः प्रतिभाया एव हेतुरिति तत्स्वरूपमिदानीं प्रस्तावयितुमाह—

१. युक्तमपास्तमिव—ङ १.
२. पदार्थापत्तिक०—ग ३.
३. इति नास्ति—का०, ज.
४. वा० प० २।१८॥
५. °व्यञ्जनात्—ज.
६. अविकल्पित—ग १.३.४.
७. वाचां—ग १. ३. ४. वाचामित्यनुक्तमपि गम्यत इति तदुपादानं नातीवोपयुज्यत इति वादा इत्येवोत्कृष्यते ।
८. मताः—क १.२.५.७.

अभ्यासात्प्रतिभाहेतुः सर्वः[1] शब्दोऽपरैः[2] स्मृतः[3] ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ॥११८॥[4]

अपरैराचार्यैः । सर्वः यः कश्चिच्छब्दः स प्रतिभाहेतुः । जडानामपि प्रतिभाहेतुरित्याह—बालानाम् इत्यादि । आस्तां विदितसमयस्य किं न भविष्यत्यसौ प्रतिभाहेतुः । येऽप्यविदितसंकेता अमी बाला जडप्राया वा तिर्यञ्चः तेषामप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडानामपि प्राणिनां नियतपदः शब्दः सम्बोधनायोदीर्यते । तेन प्रतिनियतजात्यनुसारेणैव नियतैव काचित्प्रतिभा प्रबोध्यत इति तन्मूल एव सर्वः कश्चित्तेषां व्यवहारः ।

अनेनैतदुच्यते—यदियं प्रतिभा सर्वप्राणिसंवेद्या शब्दनिमित्ता सकलव्यवहारमूलभूताऽनपह्नवनीया । तदपह्नवे स्वात्मैव विप्रलभ्यते । तत्प्रतिभाभ्युपगमोऽवश्याश्रयणीयः ॥११८॥

अभ्यासात्प्रतिभाहेतुरित्युक्तम् । तत्राभ्यासः किमिदानीन्तन उत जन्मान्तरभावी तस्य च किं स्वरूपमित्याशङ्क्याह—

अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यते ।[5]

१. सर्वः शब्दः—क १.२.५.७, तत्त्वसंग्रहे विधिविवेके च । शब्दः सर्वो—सर्वेषु टीकाकोशेषु.
२. परैः—क १.२.५.७.
३. समासतः—तत्त्वसंग्रहे विधिविवेके च.
४. तत्त्वसंग्रहे विधिविवेके च पृष्ठयोः २८६,१० उदाहृतं व्याख्यातं च. तत्त्वसंग्रहे तावदेवं व्याचष्टे कमलशीलः—शब्दस्य क्वचिद्विषये पुनः पुनः प्रवृत्तिदर्शनमभ्यासः । नियतसाधनावच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञा प्रतिभा । सा प्रयोगदर्शनावृत्तिसहितेन शब्देन जन्यते । प्रतिवाक्यं प्रतिपुरुषं च सा भिद्यते । स तु तस्या अपरिमाणो भेदः शब्दव्यवहारस्यानन्त्यान्न शक्यते विधातुमित्यत आह—बालानां च तिरश्चां चेत्यादि । यथैव ह्यङ्कुशाभिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ क्रियमाणायां प्रतिभाहेतवो भवन्ति । तथा सर्वेऽर्थवत्त्वसम्मता वृक्षादयः शब्दा यथाभ्यासं प्रतिभामात्रोपसंहारहेतवो भवन्ति न त्वर्थं साक्षात् प्रतिपादयन्ति । अन्यथा हि कथं परस्परपराहताः प्रवचनभेदा उत्प्रेक्षकथाप्रबन्धाश्च स्वविकल्पोपरचितपदार्थभेदद्योतकाः स्युरिति ॥
विधिविवेके न्यायकणिकायां वाचस्पतिमिश्रा एवं व्याकुर्वन्ति—अभ्यासजनितां भावनामभ्यासशब्देनाह । कार्ये कारणोपचारात् । नाभिधानाधीनोऽर्थबोधः शब्दादपि त्वभ्यासाधीनः । यथा हि खलु कशाङ्कुशाभिघातादयोऽनभिधायका अपि वाजिगजादीनामभ्यासात्स्वतः प्रवृत्तिनिवृत्तिहेतुमर्थप्रतिभासां प्रतिभां भावयन्तः प्रवर्तका निवर्तकाश्च तथा संक्षेपतः सर्वः शब्दो व्युत्पन्नानामव्युत्पन्नानां चेह जन्मनीत्यर्थः ॥ अयं च प्राग्भवीयोऽभ्यासोऽवश्याभ्युपेय इत्यत्र दृष्टान्तमाह—बालानां च तिरश्चां च यथार्थप्रतिपादने । अर्थाभासप्रतिभोत्पादनेन नार्थप्रतिपादनमुक्तम् ॥
५. विधिविवेके ११ पृष्ठ उदाहृतं व्याख्यातं च. हेलाराजेनापि सम्बन्धसमुद्देशे सम्बन्धशब्दे इत्यादिश्लोकव्याख्यायां सगृहीतम् ।

स चाभ्यासोऽनागम इदानीन्तनो न भवति । न हि बालस्य तदैवोपदिष्टं केन चिदिति जन्मान्तरभाव्येव । स च समय इष्यते । संकेतस्वरूपोऽसाविष्यत इति स्वरूपमेवास्य स्फुटयितुमाह–

अनन्तरमिदं कार्यमस्मादित्युपदर्शकः ॥११९॥

स चानन्तरमिदं कार्यमित्युपदर्शनस्वभावः । यथा कशाभिघातमात्रसमनन्तरमेव वाजिनोऽतियान्ति अङ्कुशाभिघातेन च गजा, एवमन्येऽपि यथास्वं प्राणिनोऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्वन्तो लोकयात्रां निर्वाहयन्तीति स्थितम् ।

एवमखण्डमेव वाक्यं प्रतिभा च वाक्यार्थ इति समाश्रयणीयम् । पदपदार्थापोद्धारमाश्रित्य प्रतिनिष्पादिकल्पनं प्रासङ्गिकादिन्यायनिर्वाहश्च भविष्यतीति व्यवस्थापितम् ॥११९॥[4]

अथ पदार्थप्रविभागश्चेत्समाश्रितस्तदुच्यतां पदस्यार्थ इति प्रविभागप्रसङ्गात्पदार्थविवेचनं मतभेदेन कर्तुमाह—

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ॥१२०॥[5]

सर्वशब्दानामपरामृष्टाकारविशेषमर्थमात्रं वाच्यमिति केचिदाहुः । एतत्सर्वशब्दानां प्रत्याय्यलक्षणं प्रत्याय्यस्य वाच्यस्य लक्षणं बोद्धव्यम् । केन तुल्यमेतत्स्यादित्याह—अपूर्वदेवता इत्यादि । अपूर्वदेवतादिपदेषु हि नाकारप्रथनम् । यत्तु गवादिपदेषु आकारप्रथनं तन्नान्तरीयकतया बोद्धव्यम् । अन्यथाऽपूर्वशब्दाद्देवताशब्दात् स्वर्गशब्दादस्त्वगवादिशब्दवदाकारादिप्रथनं स्यात् । यतश्च तेभ्यो नास्त्याकारादिप्रथनमतोऽर्थमात्रमेव तैः प्रत्याय्यत इति युक्तम् ॥१२०॥[6]

अथ गवादिशब्देभ्य आकारादिप्रथनं दृष्टं ततश्च तद्वक्तुं शक्यं यद्विशिष्टपदार्थप्रत्ययो युक्त इत्याशङ्क्याह—

प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ॥१२१॥

सास्नादिमत्स्वेव यदा गोशब्दप्रयोगं पश्यति तद्दर्शनाभ्यासात् तत्राकारपरिग्रहो यः स शब्दस्य प्रत्ययो न भवति । कस्मादित्याह—स हि इत्यादि । तस्मात्प्रयोगाभ्यासेन यत्नान्तरेण शब्दावगमव्यतिरिक्तेन स प्रवर्तते । ततश्च शब्दव्यापारोऽसौ न भवतीति अर्थमात्रमेवापरामृष्टाकारविशेषं वाच्यं युक्तमित्येकः पक्षः ॥१२१॥

इदानीं कश्चिच्छब्दवाच्यः कश्चित्तत्राकारोऽनुनिष्पादीति पक्षान्तरमाह—

केचिद्भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः ।
अनुनिष्पादिनः कांश्चिच्छब्दार्थं इति मन्यते ॥१२२॥

केचिद्भेदा जात्यादयः शब्दवाच्याः केचित्तत्रार्थप्रयोजका अनुनिष्पादिन एव, तथा तांश्च शब्दार्थं इत्यपरे मन्यन्ते ॥१२२॥

एतदेव प्रत्याख्यातुमाह—

जातेः[1] प्रत्यायके शब्दे या व्यक्तिरनुषङ्गिणी ।
न[2] तद्व्यक्तिगतान् भेदान् जातिशब्दोऽवलम्बते ॥१२३॥

जातिशब्दा जातिमात्रं प्रत्याययन्ति । व्यक्तिस्तु तत्रानुषङ्गिणी । निरधिकरणाया जातेरसम्भवादिति कृत्वा । तद्व्यक्तिगतानाकारविशेषान् जातिपदार्थपक्षे[3] जातिशब्दो नावलम्बते ॥१२३॥

एतदेव व्यक्तीकर्तुमाह—

घटादीनां न चाकारान् प्रत्याययति वाचकः ।
वस्तुमात्रनिवेशित्वात्तद्गतिर्नान्तरीयका[9] ॥१२४॥

घटादीनां प्रसिद्धानामाकारान्वाचकः शब्दो घटादिर्न प्रत्याययति पृथुबुध्नादराकारमात्रनिवेशित्वात् । न हि सकलविशेषसहितमर्थं शब्दः प्रत्याययितुमलमिति तत्राकारविशेषावगतिर्नान्तरीयकतयैवानुनिष्पादि येव बोद्धव्या ॥१२४॥

नान्तरीयकत्वमेव प्रदर्शयितुमाह—

1. तदैवो°—ङ १, का०.
2. °त्युपदर्शनम्—ख, टीकाकोशाश्च.
3. °नोऽभियान्ति—ज, का०.
4. श्रीवाचस्पतिमिश्रा विधिविवेके न्यायकणिकायामिमं श्लोकार्धमेवं व्याचख्युः—
   अनागमश्च सोऽभ्यासः ।
   आगम्यते प्राप्यते स्मादिति कारणमागमः । अविद्यमान आगमो यस्मिन्नसावनागमोऽनादिरित्यर्थः ।
   समयः कैश्चिदिष्यते इत्यादिमत्तामाह । नैयायिकादयो हीश्वरनिर्माणं शब्दार्थसम्बन्धं समय इत्याचक्षते । स चाभ्यासस्य, भावनाया विषय इत्यभ्यास उक्तः ॥
5. तन्त्रवार्तिके १।३॥ इत्यस्य व्याख्यायां तत्त्वसंग्रहे २८२ पृष्ठ चोदाहृतम् । अनन्तगोदिते तु व्याख्यातं च ।
6. देवतादिपु—का०.
7. अत्रास्य तत्त्वसंग्रहपञ्जिकागता व्याख्या संक्षिप्य लिख्यते—
   इतिशब्दो भिन्नक्रमः, अस्त्यर्थ इत्यस्यानन्तरं सम्बध्यते । अस्त्यर्थ इति यदेतत्प्रतीयते तत्सर्वशब्दानां प्रत्याय्यस्याभिधेयस्य लक्षणम् । तेन गवादिष्वर्थेषु विषयभूतेषु यद्गवादिशब्दप्रत्याय्यं तदपूर्वदेवतास्वर्गैस्तुल्यमित्याहुः । यथैव ह्यपूर्वादिशब्दा नाकारविशेषं बुद्धिषु संनिवेशयन्ति तथा दृष्टार्थेष्वपि गवादिशब्देषु तुल्यम् । यस्तु गवादिशब्देषु आकारविशेषपरिग्रहः केषां चिदुपजायते स तेषां सिद्धान्तबलात् ॥

1. तु—ग ४.
2. यत्राका°—का०. अपपाठः ।
3. शब्दा व्यापारो—का०.
4. °च्छब्दार्थान—क १.२.५.७, ग १.३.४. परमिदमशुद्धम् । निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिरिति नियमव्याकोपात् ।
5. जाति—ख, टीकाकोशाश्च.
6. तद्—क १. २. ५. ७, ख.
7. तान् व्यक्ति°—का०. एतत्परिग्रहे तु या व्यक्तिरनुषङ्गिणी इति प्रतिनिर्देश्यमाकाङ्क्षितं न स्फुरते । अर्थसङ्गतिरपि न स्फुटा ।
8. °पक्षो—का०. अपपाठः
9. °नान्तरीयका—टीकाकोशाः । परं नेदं छन्दोनुरूपम् । ...

क्रिया विना प्रयोगेण न दृष्टा शब्दचोदिता ।
प्रयोगस्त्वनुनिष्पादी शब्दार्थ इति गम्यते ॥१२५॥

यत्नेनेति शब्दचोदिता क्रिया कर्तृकर्मसाधनसामग्रीं विना न दृश्यते । ततश्चासौ साधनयोगो यथा तत्रानुनिष्पादी तथा शब्दार्थो ऽवगन्तव्य इत्युपसंहतम् ॥१२५॥

अथ सर्व एवाकारा गुणप्रधानभावेन पदस्यार्थ इति तृतीयं पक्षं दर्शयितुमाह—

नियतास्तु प्रयोगा ये नियतं यच्च साधनम् ।
तेषां शब्दाभिधेयत्वमपरैरनुगम्यते ॥१२६॥

येन केनचिद् विना शब्दस्याभिधेयं न निर्वहति तत् सर्वं साध्यसाधनात्मकं शब्दाभिधेयं वक्तुं युक्तम् । किं चित्प्रत्याय्यते, अन्यत्तत्र नान्तरीयकत्वादवगम्यत इत्यपि न शोभनम् । किन्तु सर्वाकारमेवाभिधेयं गुणप्रधानभावेन तैस्मात्प्रतीतमित्ययं पक्षः शोभनः ॥१२६॥

समुदाय एव तुल्यकक्ष्यतया शब्दस्यार्थ इति चतुर्थं पक्षं दर्शयितुमाह—

समुदायोऽभिधेयो[4] वाप्यविकल्पसमुच्चयः ।[5]

ननु यद्याकारसमुदायं समुच्चितमेव प्रत्याययति तर्हि बहुवचनमेव तत्र स्यात् । अथ विकल्पितं प्रत्याययति तदा वचनविकल्पः स्यादित्याशङ्क्याह—**अविकल्पसमुच्चयः** इति । अविद्यमानौ विकल्पसमुच्चयौ यस्यासौ तथाभूतस्तस्मात्प्रतीयत इति सम्भाव्यते । एतच्चोपमासमुद्देशेऽप्यर्थविचारणावसरे सविस्तरं प्रदर्शयिष्यति ।

अथ जातिगुणक्रियात्मकस्यार्थस्यासत्यभूतः संसर्ग एव शब्दार्थ इति पञ्चमं पक्षं दर्शयितुमाह—

१. मन्यते—**टीकाकोशाः.** परं नेदं टीकाकारेण पठितमिति शब्दार्थोऽवगन्तव्य इति तदुक्तेरवसीयते । लेखकस्तु २।१२१॥ इत्यत्र गतेन 'शब्दार्थ इति मन्यते' इत्यनेन वासितान्तःकरणेरत्रापि तथैव लिपीकृतमिति नासम्भवि ।

२. गुणप्रधानं°—**का०.** अपपाठः.

३. तस्मात्प्रतीत°—**का.** अपपाठः.

४. भिधेयः स्यादविकल्प°—**टीकाकोशाः.** मूलकोशेषु तु नैकत्रायं पाठः ।

५. अयं श्लोकार्धं **तत्त्वसंग्रहे** ८४तमे पृष्ठ उदाहृतं तत्र पञ्जिकायां व्याख्यातश्च । सा च व्याख्या विषयवैशद्यकरीति संगृह्यते—
केचिद् ब्राह्मणादिशब्दैस्तपोजातिश्रुतादिसमुदायो विना विकल्पसमुच्चयाभ्यामभिधीयत इत्याहुर्यथा वनादिशब्दैर्धवादय इति । तथा हि । वनमित्युक्ते धवो वा खदिरो वा पलाशो वेति न विकल्पेन प्रतीतिर्भवति । नापि धवश्च खदिरश्च पलाशश्चेति समुच्चयेन । अपि तु सामान्येन प्रतीयन्ते धवादयः । तथा ब्राह्मण इत्युक्ते तपो वा जातिर्वा श्रुतं वा, तपश्च जातिश्च श्रुतं चेति न प्रतिपत्तिर्भवति । अपि तु साकल्येन सम्बन्ध्यन्तरव्यवच्छिन्ना तपःप्रभृतयः संहताः प्रतीयन्त इति । तत्र बहुष्वनियतैकसमुदायिभेदावधारणं विकल्पः । एकत्र युगपदभिसम्बध्यमानस्य नियतस्यानेकस्य स्वरूपभेदावधारणं समुच्चयः । अविद्यमानौ विकल्पसमुच्चयौ यस्य स तथोक्तः ॥

असत्यो[1] वापि[2] संसर्गः शब्दार्थः कैश्चिदिष्यते ॥[3]१२७॥

घटादिभिः शब्दैर्घटादीनां जात्यादिसंसर्ग उच्यते । स चात्र तद्व्यतिरेकेणानुपलम्भादसत्यभूत एवोच्यते । तस्मात् संसृष्टः पदार्थ एव सत्यभूत इति ॥१२७॥

अथ सत्यमेवासत्योपाधिविचित्रितं शब्दवाच्यमिति षष्ठं पक्षमाह—

असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम् ।

शब्दस्य वा स्वरूपमेवाभिधेयमिति सप्तमं पक्षं दर्शयितुमाह—

शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यताम् ॥१२८॥

अभिजल्पत्वमध्यासरूपत्वमागतः शब्द एव स्वरूपलक्षणः शब्दस्य वाच्यः ॥१२८॥[4]

अभिजल्पस्वरूपमाह—

सोयमित्यभिसंबन्धाद्रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥१२९॥[5]

सोयमित्यभिसम्बन्धोऽध्यासाख्य उच्यते । तेन पदार्थस्वरूपमाच्छादितमेकीकृतमिव प्रत्याय्यते, तदाऽभिजल्पः शब्द उच्यते । अध्यासवशाच्छब्दार्थयोरेकात्मत्वेप्यर्थांशस्यैव प्राधान्यमुपयोगवशात् ॥१२९॥[6]

कश्चित्तु विषयभेदेन द्वयोरपि दृश्यत इति प्रसङ्गादभिधातुमाह—

१. असत्योपाधि—ग १.३.४.
अनुपदमसत्योपाधि इति वक्ष्यमाणत्वात्तद्गतचेता लेखकोऽत्रापि तथैव न्यवीविशत् । यथापरः ख-संज्ञके कोशे पूर्वत्र असत्यो वापि इत्यस्य सत्त्वात् परत्रापि श्लोके तदेवालेखीत् । तच्च विशेष्यतो भिन्नलिङ्गत्वादनर्थकत्वाच्च व्यक्तमशुद्धम् । किं च । चिरन्तने तत्त्वसंग्रहे ग्रन्थेऽसत्यो वापि इत्यस्योपलम्भादतन्त्र्युपेयो दाक्षिणात्यानां पाठ इति दृढं प्रतीमः ।

२. इदं तत्त्वसंग्रहे २८४ तमे पृष्ठ उदाहृतं व्याख्यातं च यथा—
अन्ये तु द्रव्यत्वादिभिरनिर्धारितरूपैः सम्बन्धो द्रव्यादीनां स शब्दार्थः, स च सम्बन्धिनां शब्दार्थत्वेनासत्यत्वादसत्य इत्युच्यते । यद्वा तपःश्रुतादीनां मेचकवर्णवदैक्येन भासनादेषामेव परस्परमसत्यः संसर्गः । तथा ह्येते प्रत्येकं समुदिता वा न स्वेन रूपेणोपलभ्यन्ते किन्त्वलातचक्रवदेषां समूहः स्वरूपमुत्क्रम्यावभासत इति ॥

३. असत्यो वापि—**ख.** यथोक्तमपपाठः ।

४. °जल्पत्व—**का०.** अशुद्धं वक्ष्यमाणे श्लोकेऽभिजल्पस्वरूपनिरूपणात् ।

५. अयं सम्पूर्णः श्लोकस्तत्त्वसंग्रहे ८४ तमे पृष्ठ उदाहृतो व्याख्यातश्च यथा—
अन्ये त्वाहुः—यदसत्योपाधि सत्यं स शब्दार्थ इति । तत्र शब्दार्थत्वेनासत्या उपाधयो विशेषा वलयाङ्गुलीयकादयो यस्य सत्यस्य सर्वभेदानुयायिनः सुवर्णादेस्सामान्यात्मनस्तत्सत्यमसत्योपाधि । **शब्दनिबन्धनमिति ।** शब्दप्रवृत्तिनिमित्तमभिधेयमित्यर्थः । अन्ये ब्रुवते—शब्द एवाभिजल्पत्वमागतः शब्दार्थ इति ॥

६. अयं श्लोकस्तत्त्वसंग्रहे २८५ तमे पृष्ठ उदाहृतो व्याख्यातश्च ।

तयोरपृथगर्थत्वे[1] रूढेरव्यभिचारिणि[2] ।
किंचिदेव क्वचिद्रूपं[3] प्राधान्येनावतिष्ठते ॥१३०॥

तयोः शब्दार्थयोरभ्यासवशाद्रूढेर्नियमादेवाव्यभिचारिण्यपृथगर्थत्वे एकरूपत्वे सति किं चिदेव रूपं योगवशात् क्वचिदेव लोके शास्त्रे वा प्राधान्येनोद्रिक्ततयाऽवतिष्ठते ॥१३०॥

तत्र लोकेऽर्थांशस्यैव प्राधान्यमित्यपि दर्शयितुमाह—

लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते ।

अर्थरूपतां प्रतिपन्नोऽर्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्तते । अयं गौरित्यादि । तत्रार्थ एव वाच्यतया प्रधानमवसीयते ।

शास्त्रे तु शब्दस्योभयरूपतापि विभागेन परिदृश्यत इत्याह—

शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ॥१३१॥

शास्त्रे हि स्वरूपप्रधानो निर्देशः क्वचित्,क्वचिच्चार्थप्रधानोपीत्युभयरूपता शब्दस्य दृश्यते॥१३१॥

इदानीमर्थेषु न शक्तिः पृथगस्ति किं तु शब्दाधीनेति यथा ते शब्दैर्विधीयन्ते तथैवावगम्यन्त इति स्वमाहात्म्योपस्थापित एव शब्दार्थ इत्यष्टमं पक्षं दर्शयितुमाह—

अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥१३२॥

अथ वा सर्वशक्तिरर्थो व्यवस्थितः । तस्य प्रतिनियतशक्त्यभिधानं शब्देनेति नवमं पक्षं दर्शयितुमत्रैवोक्तम्—सर्वशक्तेर्वा इति । शक्त्यैवार्थः कदा चित्क्रियारूपतयाभिधीयते । कदाचित्सिद्धरूपतयेति नियता क्रियादिरूपता शब्दार्थतया प्रतिपाद्यते ॥१३२॥

अथ वा बुद्ध्युपारूढ एव शब्दस्यार्थो न बाह्य इति दशमं पक्षमुपदर्शयितुमाह—

यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
स बाह्यं[7] वस्त्विति ज्ञातः शब्दार्थ इति[6] गम्यते[8] ॥१३३॥[9]

शब्दस्य बुद्ध्युपारूढस्य वैकल्पिकस्य यो बुद्ध्युपारूढो बाह्यवस्तुनिबन्धनः, बाह्यं[10] वस्तु विक-

१. °पृथगात्मत्वे—क १.२.५.७, ग १.३.४.
२. रूढिरव्यभिचारिणी—क१.२.५.७,ग१.३ ४.
३. चिद्द्रव्यं—का०. अपपाठः.
४. चा—का०.
५. शक्त्यर्थः-का०, छ १, ज-संज्ञके तु पूर्वं शक्त्यार्थ इति विन्यस्य पश्चात्संशोध्यैवं लिखितम् ।
६. इति नास्ति - का०
७. बाह्य—क १.२.७, ख, टीकाकोशाश्च.
८. कश्चिदिष्यते–टीकाकोशाः, तत्त्वसंग्रहश्च । सम्यगिष्यते—लघुमञ्जूषायां ३३७ तमे पृष्ठे । मूलकोशेषु तु सर्वत्र 'इति गम्यते' इत्येव दृश्यते । मूलकोशानुसरणमेव न्यायादापतति ।
९. अयं श्लोकस्तत्त्वसंग्रहे २८५ तमे पृष्ठ उदाहृतो व्याख्यातश्च सविस्तरम् ।
१०. बाह्य—का०, छ

ल्पजननद्वारेण निबन्धनं यस्य स तथाभूतः । स च वैकल्पिकोऽर्थो भ्रमवशात् दृश्यविकल्पैकाकारेणा-बहीरूपोऽपि बहीरूपतयाध्यस्तोऽध्यस्तमेव वस्त्ववगच्छामि शब्दादिति शब्दनिमित्तमिति शब्दार्थ इष्यते[1] ॥१३३॥

इदानीं गवादीनां[2] शब्दानामाकारविशेषवानर्थोऽपूर्वप्रभृतीनां संविन्मात्रमपरामृष्टाकारविशेषमर्थ इत्येकादशं पक्षमाह—

आकारवन्तः संवेद्या व्यक्तस्मृतिनिबन्धनाः ।
ये[4] ते[3] प्रत्यवभासन्ते संविन्मात्रं ततोऽन्यथा ॥१३४॥

कैश्चिच्छब्दैः संवेद्याः प्रत्याय्या आकारविशेषवन्तो व्यक्तस्मृतिनिबन्धनाः प्रत्यवभासन्ते । कैश्चिन्निराकाराः संविद्रूपाः प्रत्याय्यन्ते । तेषां तथैवार्थो व्यवस्थाप्यते ॥१३४॥

इदानीं प्रतिनियतवासनावशेनैव प्रतिनियताकारोऽर्थस्तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयत इति द्वादशं पक्षमाह—

यथेन्द्रियं संनिपतद्वैचित्र्येणोपदर्शकम्[5] ।
तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा ॥१३५॥

अविपरीतमप्यर्थमिन्द्रियं दोषवशान्नानारूपमवभासयति यथा तथैव नियतवासनावासितचेतसां शब्दार्थप्रतीतिरिति नास्ति कश्चिन्नियत एकः शब्दस्यार्थः ॥१३५॥

एतदेव व्याख्यातुमाह—

वक्त्रान्यथैव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु ।
स्वप्रत्ययानुसारेण[6] शब्दार्थः प्रविभज्यते ॥१३६॥

१. अत्रास्य श्लोकस्य तत्त्वसंग्रह–पञ्जिकागता व्याख्या संक्षिप्य लिख्यते—बुद्धिविषयः इति । बुद्धौ विपरिवर्तमानः, बुद्धिस्थ इति यावत् । बाह्यवस्तुनिबन्धनः इति । सदसद्बाह्यं वस्तु निबन्धनमक्षरचिह्नस्थानीयं स्वरूपमुपदर्शयितुं प्रक्रम्यते यस्य स बाह्यवस्तुनिबन्धनः । बाह्यं वस्त्विति ज्ञातः इति । बुद्धिरूपत्वेनाविर्भावितो बाह्यतयाध्यवसित इत्यर्थः । तथा हि यावद् बुद्धिरूपमर्थेष्वप्रत्यस्तं बुद्धिरूपमेवेति तत्त्वभावनया गृह्यते तावत्तस्य शब्दार्थत्वं नावसीयते । तत्र क्रियाविशेषसम्बन्धाभावात् । न हि गामानय दधि खादेत्यादिकाः क्रियास्तादृशि बुद्धिरूपे सम्भवन्ति । क्रियायोगसम्भवी चार्थः शब्दैरभिधीयते । अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः । यदा तु बाह्यवस्तुनि प्रत्यस्तो भवति तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रियासाधनसामर्थ्यं तस्य मन्यत इति भवति शब्दार्थः ॥
२. व्यक्तिस्मृति°—क१.७, ग १.३.४.
३. एतं—ग १.३.४.
४. त्वतो°—क १.२.५.७, ख, छ१,ज.
५. °दर्शनम्—क १.५ ७.
६. °नुकारेण—ग १.३.४, टीकाकोशाश्च. टीकाकृता टीकायान्तु स्वप्रत्ययानुसारेण इत्येव धृतम् । इदमेव च श्रेयः ।

अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुप्रश्नाह—

विच्छेदग्रहणेर्थानां प्रतिभाऽन्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ॥१४४॥

देवदत्तादिपदेभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थेनतिव्यतिरिक्तैव जायते । तां च वाक्यार्थं वैयाकरणा आहुः । कस्तस्या उपाय इत्याह —पदार्थैरुपपादिताम् इति । पदार्थैरसत्यैरेवोपाधिभूतैरुपपादितामभिव्यक्तामिति ॥१४४॥

कीदृशी तामित्याह—

इदं तदिति सान्येषामनाख्येया कथं चन
प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते ॥१४५॥

सा चोपजायमाना आख्यातुमन्यस्य न शक्यते, केवलं स्वसंवेदनसिद्धैवासौ प्रतिपत्त्रापि स्वसंवेदनसमये नियतेन रूपेण निरूपयितुमशक्यैव सा ॥१४५॥

किम्भावासावित्याह—

उपश्लेषमिवार्थानां सा करोत्यविचारिता ।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्तते ॥१४६॥

असंबद्धानां पदार्थानामसावुपश्लेषं मेलनं करोति । सर्वरूपे च वाक्ये पदार्थानां वाऽसौ विषयत्वेन वर्तते । तन्निष्ठास्ते साकल्यं भजन्त इति ॥ १४६॥

तां च न किं चित्प्राणिमात्रमतिवर्तते अतिक्रम्य तिष्ठतीत्याह—

१. ऽन्यैव—ग १.३.४.
२. प्रत्यर्थवृत्ति°—ग १.३.४.
३. सिद्धैवासौ—का०. अपपाठः.
४. प्रतिपत्त्रापि—का०. स्फुटमशुद्धम् ।
५. आ—विधिविवेके.
६. इदं विधिविवेके २५२ तमे पृष्ठे संगृहीतं व्याख्यातं च न्यायकणिकायाम् ।
७. चासौ—ज.
८. इमं श्लोकं मनसिकृत्याचार्य-मण्डन एवमाह—

विच्छिन्नप्रतीतीनामपि च पदार्थानां किं कथमनुसन्धीयेत इति विचारविकल्पाऽप्रत्ययमृष्टपूर्वशक्तिः समाविष्टपूर्वशक्तिप्रत्ययभागेवोदीयमाना (प्रतिभा) उपश्लेषं विदधाति । तादर्थ्यादनुपश्लेषे तदभावात् । अत्र वाचस्पतिमिश्रा एवं विवृण्वते—विच्छिन्नप्रतिपत्तीनां तापह्रदतोयादीनां सहसोपश्लेषं विदधाति । अयमर्थः । संतापततनवो हि शीतह्रददर्शनमात्रादप्सु निमज्जनाः प्रवर्तन्ते, नान्तरा विचारयन्ति । दृश्यमानह्रदगता आपस्तापमपनेतुं समर्थाः, सति शिशिरभावे तोयत्वात्तोयं शिशिरं तत्तत्सर्वं तापापनोदनसमर्थं, यथा गङ्गातोयं, वयं च तप्तास्तदिह तत्प्रशमनाय निमज्जाम इति । नाना चैतेषां परस्परोपश्लेषमन्तरेण कर्तव्यता । न वास्यामसत्यां स्वतन्त्रचेतनप्रवृत्तिः । न चोपश्लेषे समुदाचरद्वृत्ति किंचित्प्रमाणमस्ति । तस्मादसंविदितरूपा शब्दभावनैव इदमित्थमनेन कर्तव्यमिति प्रतिभाहेतुरास्थेयः । न चासौ व्यतिरिक्तविषयेत्याह—सार्वरूप्यमिवापन्ना । तेषां सार्वरूप्यमापन्नेव न त्वापन्ना । तेषां तदा—

साक्षाच्छब्देन जनितां[1] भावनानुगमेन वा ।
इतिकर्तव्यतायां[2] तां न कश्चिदतिवर्तते ॥१४७॥[3]

सा साक्षाच्छब्देन कदा चिद्व्यवहारकाले जन्यते । जन्मान्तरभावनावशेन वा गजवाजिप्रभृतीनामिति तन्मूल एवेतिकर्तव्यतारूपः सर्वस्य व्यवहारः ॥१४७॥

एतदेव स्फुटयति—

प्रमाणत्वेन तां लोकः सर्वः समनुगच्छति[4] ।
समारम्भाः[5] प्रतीयन्ते[6] तिरश्चामपि तद्वशात् ॥१४८॥[7]

सर्वः कश्चित्तामेव भगवतीं स्वप्रतिभां प्रमाणत्वेन पश्यति । तथा चोच्यते—

सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ।[8] इति

तिरश्चां च जातमात्राणां तन्मूल एव व्यवहार इति न तदपह्नवेन आत्मा वञ्चनीयः ॥१४८॥

सिद्धैव चेयं सर्वस्य प्रतिभेत्युपपादयितुमाह—

यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः ।
मदादिशक्तयो[9] दृष्टाः प्रतिभास्तद्वतां तथा ॥१४९॥

यथा द्रव्यविशेषाणां परिपाकव्यतिरिक्तयत्नान्तरनिरपेक्षा मदादिशक्तयो दृश्यन्ते, तथैवेयं

—रोहिणां वस्तुसत्ताया विचारासहत्वात् । तस्मात्प्रतिभैव तादृप्यमापन्ना विषयत्वेन वर्तते ॥

१. जनिता—क १.५.७, विधिविवेके, न्यायकणिकायां च.
२. इतिकर्तव्यता या—विधिविवेके २९५ तमे पृष्ठे ।
अन्यत्र तत्रैव मूलगतः पाठोऽप्युपात्तः । अयमपि साधुः पाठः । "कः पुनरयमर्थः कर्तव्यमिति । न कश्चित् । प्रतिभा" इति मण्डनोक्तेः प्रतिभाया इतिकर्तव्यतायाश्चाभेदस्याभ्युपगमात् । क १.५.७. इतिसंज्ञकेषु कोशेषु इतिकर्तव्यमाया इति पाठः । तत्र तकारस्थाने भ्रान्त्या मकारो विन्यस्तः स्यात् ।
३. इदं विधिविवेके २५३तमे पृष्ठे संगृहीतम् । एतदनुरूपमेवान्यत्र २४८ तमे पृष्ठे श्रीमण्डनमिश्रा आचक्षते—
प्रतिभानेत्रो हि लोक इतिकर्तव्यतासु समीहते । किं पुनरस्या निमित्तम् । शब्दः । तत्र व्युत्पन्नानां साक्षाद् , भावनामुखेन वाऽप्रसिद्धशब्दनिबन्धनव्यवहाराणां बालादीनाम् इति ।
४. समनुपश्यति—टीकाकोशाः. मूलकोशेषु तु नैकत्रायं पाठः । विधिविवेकेपि समनुगच्छति इत्येव पाठः ।
५. व्यवहाराः—विधिविवेके.
६. प्रतीयन्ते—ख, टीकाकोशाश्च । नेदं साधु । प्रवर्तन्ते—विधिविवेके.
७. इदं विधिविवेके २५३तमे पृष्ठे संगृहीतम् ।
८. अभिज्ञानशाकुन्तले १।१९॥
९. मन्दादि°—क १.२, ख,छ ५ वर्जं टीकाकोशाश्च.
१०. टीकाकोशेषु छ ५ इत्यतोऽन्यत्र सर्वत्र मन्दादि° इत्येव यद्यप्युपलभ्यते परं नाद इष्टार्थसमर्पकमिति विपरिवर्तितम् ।

येनार्थेनाभिसम्बद्धमभिधानं प्रयुज्यते ।
तदर्थापगमे तस्य प्रयोगो विनिवर्तते ॥१५९॥

प्रयुज्यते शब्द इत्यन्ये तत्र प्रयोजनस्याभिधेयस्य नियतं लक्षणमाचक्षते ॥१५९॥

एतदर्थं परमार्थत इदं वाच्यमित्याह—येनार्थेनेति ।

येनार्थेन जात्यादिना प्रयोजकेन ॥१५९॥

यांस्तु संभविनो धर्मानन्तर्णीय प्रयुज्यते ।
शब्दस्तेषां न सान्निध्यं नियमेन व्यपेक्षते ॥१६०॥

ये शब्दस्याप्रयोजकाः प्रयोजकसहकारिणः सम्बन्धिनः शब्दप्रवृत्तिकाले पदार्थैकदेशभूता इवोपलभ्यन्ते तेषां सान्निध्यमसान्निध्यं वा शब्दप्रवृत्तावकारणम् ॥१६०॥

वक्तुरिच्छया धर्मान्तर्भावनेन तु प्रयुज्यमानोपि शब्दो न तेषां सर्वेषां नियमेन प्रत्यायनं करोतीत्याह—यांस्तु इति ।

यथा रोमशफादीनां व्यभिचारेऽपि दृश्यते ।
गोशब्दो न तथा जातेर्विप्रयोगे प्रवर्तते ॥१६१॥

शृङ्गरोमशफादीनां प्रयोजकानामसान्निध्येपि गोशब्दस्य मुख्या प्रवृत्तिः । ननु(?)गोत्वेन प्रत्यये तु जातिविशिष्टे जात्याश्रये द्रव्ये वर्तते । तत्रावयविप्रवर्तना-[याम] वयवेषु । अभक्ष्यो ग्राम्यसूकर इत्यत्र भक्षयतिक्रिया तथाभूतमेव साधन-[भूतं द्रव्यावयवमपेक्षते] । दृष्टा च विकारे च प्रकृतौ च प्रकृतिशब्दप्रवृत्तिः । अवयवे च समुदाये च समुदायशब्दप्रवृत्तिदर्शनम् ॥१६१॥

एतदेवान्वयव्यतिरेकाभ्यां स्फुटीकुर्वन्नाह—यथा रोमेति ।

दुर्लभं कस्य चिल्लोके सर्वावयवदर्शनम् ।
कैश्चित्त्ववयवैर्दृष्टैरर्थः कृत्स्नोऽनुमीयते ॥१६२॥

न हि परिपूर्णावयवं कश्चित्कलापं प्राकृतदर्शनो ह्यवि······प्रतिपद्यते । तत्र केषाञ्चिदवयवानां ग्रहणे व्यक्तिजातीयोऽवयवी निर्धार्यते । तद्यथा । गवादीनां पूर्वार्धस्यापरार्धस्य वा दर्शने । क्वचित्तु सन्देहो नैव निवर्तते । तद्यथा । दधिमात्रदर्शने । पटप्रावरणादिदर्शने त्ववयवा दृश्यमाना नियतानियतानुमानहेतवो भवन्ति । तत्रापि केचिज्जात्यन्तरनिवृत्त्यर्थायां श्रुतौ श्रुतिपक्षस्य मन्यन्ते । केचिद्देशान्तर्भूतेभ्यस्तेभ्योऽवयवेभ्योऽनुमानात् स्वविषये शब्दाः प्रवर्तन्त इत्याचक्षते ।१६२॥

१. येनार्थेनाभिसम्बन्धम्°—क १.२.५.७ । °भिसम्बन्धम्°—ग १.३.४.
२. तदर्थोऽपगमे—क १.२.५.७.
३. प्रति निवर्तते—ग १.३.४.
४. °न्तर्नीय का०, ज. अयमपपाठः । णत्वं विधेयेऽन्तरित्यस्योपसर्गवद्वृत्तेरुपसंख्यानात् ।
५. स—क ७.
६. व्यभिचारो—ख, छ ४, ज.
७. कुत्र न नीयते—वृत्तिकोशः.
८ वालधिमात्रेति पाठः स्यात् ।

एवं च न शब्दस्यैव रूपं प्रत्यक्षमप्यर्थसाक्षात्कारोपनायकमेवमेवार्थस्वरूपपरिच्छेदकं दृष्टमित्याह—दुर्लभम् इति ।

युगपत्सर्वावयवदर्शनस्यासम्भवात्कतिपयावयवदर्शनेन सकलार्थपरिच्छेदस्तत्रानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति ॥१६२॥

तथा जात्युत्पलादीनां गन्धेन सहचारिणा ।
नित्यसम्बन्धिनां दृष्टं गुणानामवधारणम् ॥१६३॥

गन्धोत्पलबुद्ध्यनुमितो हि जात्युत्पलादिषु यः शब्दः प्रयुज्यते न स गन्धमात्रमाश्रित्य गन्धसमवायं वा द्रव्यमात्रं प्रत्याययति । सहचारीणि गुणान्तराण्यपि तत्रानुमीयन्ते । न च तद्वाचिनश्शब्दा दृष्टे सहचारिण्यनुमानेन हेतौ प्रवर्तन्त इत्यभ्युपगम्यन्ते । केषाञ्चित्समुदायवाचिनामुत्पलादिशब्दवाच्यत्वमिति (?) संख्याप्रमाणसंस्थानजनकत्वेन विना गवादिषु गोशब्दस्य विषाणादिसन्निधिप्रयुक्ताभिमुख्या प्रवृत्तिर्दृश्यते ॥१६३॥

तथैव शब्दादेकदेशावसायेन नित्यसहचारिधर्मान्तरावगमो जायत इत्याह—तथेति ।

जातिगन्ध उत्पलगन्ध इति शब्दाद्विशिष्टस्य गन्धमात्रस्यावगतिः । तत्सहचारिरूपस्पर्शाद्यवधारणं तत्र नान्तरीयकं न मुख्यमिति बोद्धव्यम् ॥१६३॥

उपसंहर्तुमिदानीमाह—तस्मात् इति ।

तस्मात्सम्भविनोर्थस्य शब्दात्सम्प्रत्यये सति ।
अदृष्टविप्रयोगोर्थः सम्बन्धित्वेन गम्यते ॥१६४॥

तस्मात्संप्रतीयमानोपि सहचारिणः संभविनश्शब्दार्थ इति विज्ञायते । नहि तथाभूतेनार्थात्मना शब्दस्य सम्बन्धोपि युज्यते ॥१६४॥

नैयत्येनादृष्टविप्रयोगो जात्यादिरेव शब्दस्य सम्बन्धित्वेन वाच्यत्वेन गम्यत इति बोद्धव्यम् ॥१६४॥

वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः ।
स्याद्वा संख्यावतोर्थस्य समुदायोभिधायकः ॥१६५॥
विना संख्याभिधानाद्वा संख्याभेदसमन्वितान् ।
अर्थान् स्वरूपभेदेन कांश्चिदाहुर्गवादयः ॥१६६॥

१. सकलार्थ—ज.
२. यथा—टीकाकोशाः. नायं युक्तः पाठः । न हि शास्त्रकारः पूर्वोक्तमेवार्थं निदर्शयति किन्तर्हि कञ्चिद्विशेषमाह । स च तथेत्यनेन साधु समुच्चीयते ।
३. सहचारिणा—ग १.३.४.
४. °सम्बन्धिना—ग ४.४.
५. तत्सहचरितं—छ ५.
६. °विप्रयोगार्थः—ग १.३.४.
७. वर्तते—टीकाकोशाः. परं नेदं टीकाकृता कारिकायां पठितमिति वाच्यत्वेन गम्यत इति तदुक्तेरवसीयते ।

यथैव वाक्यात्पदार्थप्रविभागेन व्यवहारः क्रियते तथा पदादपि प्रकृतिप्रत्ययापोद्धारेण शास्त्रे भूयान् व्यवहारो दृश्यते। तत्र के चित्तावन्मन्यन्ते—सत्येवान्वयव्यतिरेके यावानेवान्वयव्यतिरेकाभ्यामर्थः समधिगम्यते तावानेवास्ति, न तु कश्चिदन्यः समुदायार्थः। स तु समुदायार्थः पदस्य वाक्यवदशब्द इति। न्यायविदस्तु मन्यन्ते—स्वबुद्धिपरिकल्पितसमर्थापिता एव शिष्टैर्बहुधा प्रकृतिप्रत्ययादयः। तेषां चार्थाः शास्त्र एवमाचार्यार्थे निमित्तभूता अन्वयव्यतिरेकाभ्यां व्यावहारिकाभ्यां कृतप्रविभागा एवाश्रीयन्ते। कथं बुद्ध्योर[र्थ]प्रतिपादनोपायमात्रमेतत्। सर्वथा च प्रतिपत्तौ लौकिकस्यार्थस्य भेदो नास्ति। तथा हि केषां चित्स्वार्थद्रव्यलिङ्गसंख्याकर्मादयः प्रातिपदिकेनाभिधीयन्ते, द्योतिकास्तु कर्मादीनां विभक्तयः। केषां चित् स्वार्थद्रव्यलिङ्गमात्राभिधायिनी प्रकृतिः, वाचिकाः संख्याकर्मादीनां विभक्तयः। प्रातिपदिकार्थे विकल्पेन संख्याकर्मादीनां यथासम्भवमभिधानं विज्ञायते। लिङ्गमपि केषां चित् द्योत्यं केषां चिदभिधेयम्। द्योतनमपि द्विविधम्। अनाविर्भूताविर्भावनम्। अभ्युदासप्रसङ्गे वा प्रकारान्तरव्युदासेन कस्याचिदवधारणम्। तद्यथा प्रतिष्ठते उत्पुच्छयते अभिमनायत इति। तदपि प्रसिद्धाप्रसिद्धावियुतप्रयोगाणाम्। उपास्ते प्रपचति, अधीते अध्येतीनि यथा। सहाभिधानं वा। यावकः गोपायिता ब्राह्मणाधीनं जुगुप्सत इति।

अथवा संख्यावतोर्थस्याविभक्तोद्देशः समुदायः संसृष्टानेकशक्तिरभिधायकः। विना संख्याभिधानेन शब्दप्रवृत्तिकाले तैस्तैरभिधीयमानैः संख्याविशेषैः काककण्ठे गुणकम्बलादिवनीयैः (१) परिच्छिन्नास्तद्वन्तोर्थाः स्वरूपभेदयुक्तैः समुदायैरभिधीयन्ते ॥१६५-१६६॥

एवं नामपदस्यार्थविचारं कृत्वेदानीं तस्यैव भागार्थविचारं प्रस्तौति। तत्र प्रत्ययभागस्यार्थविचारं तावदाह—वाचिका इति।

तेन प्रत्ययभागस्य संख्याकर्मादयो वाच्यत्वेन द्योत्यत्वेन वार्था इति ज्ञेयम्।

इदानीं प्रकृतिभागस्यार्थमभिधातुं प्रकृतिप्रत्ययसमुदाय एव संख्यादिविशिष्टस्यार्थस्याभिधायक इत्याह—स्याद्वा इति।

अथवा संख्याद्युपलक्षितमेवार्थं प्रकृतिप्रत्ययसमुदायोभिधत्त इत्यभिधातुमाह—विनेति।

स्वल्पभेदेन द्वित्वादिभेदेनेत्यर्थः ॥१६६॥

ये शब्दा नित्यसम्बन्धा विवेके[1]ज्ञातशक्तयः।
अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते ॥१६७॥

भिन्नेषु कूपयूपादिवत्समुदायेषु यथायथं शब्देषु नित्यसम्बन्धेषु परिकल्पितानामवयवानां सम्बन्धिभिरव्यभिचरितसम्बन्धानां बुद्ध्या कृतापोद्धारप्रविवेकानां रूपभेदप्रत्ययपरिकल्पप्रत्ययविषयाणामौपचारिकाभ्यां प्रतिपादनार्थमन्वयव्यतिरेकाभ्यामभिधायकत्वेन द्योतकत्वेन वा व्यभिचारप्रविभागः क्रियते ॥१६७॥

1. विवेक—क २.५.७.

ननु यदा शब्दा नित्यसम्बन्धा विवेकेन ज्ञातशक्तयः स्वार्थस्य प्रतीतौ तदा कथमेतदवगतमयं प्रकृत्यर्थोयं प्रत्ययार्थ इत्याशङ्क्यापोद्धारस्यान्वयव्यतिरेकौ निमित्तमिति प्रतिपादयितुमाह—ये इति।

विवेके सति शब्दार्थविभागे कृते, सति च प्रातिपदिके प्रत्यये चासत्येकत्वादिविरहिते वृक्षत्वमात्रमवगम्यत इत्येवमन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थविभागो व्यवस्थाप्यते ॥१६७॥

यत्र चाव्यभिचारेण तयोः शक्यं प्रकल्पनम्[1]।
नियमस्तत्र न[2] त्वेवं[3] नियमो नुट्शबादिषु[4] ॥१६८॥

अन्वयव्यतिरेकावर्थरूपविषयावनुगम्यमानावव्यभिचारेण यावदनुगन्तुं शक्येते तावदनुगम्येते। कूपयूपसूपेषु तु रूपसमन्वयेपि अर्थासमन्वयान्नानुमन्येते। तथास्शब्दादीनामर्थसंज्ञाप्रतिपादितेपि प्रत्ययत्वे लिङादिष्वदर्शनादन्वयव्यतिरेकाभ्यामर्थो न प्रकल्प्यते। तत्रापि कैश्चिदेकत्वादिनिबन्धनत्वमेव तिङामभ्युपगम्यते। तथा कैश्चित् स्यति स्यतः स्यन्ति इत्येकमेव प्रत्ययरूपमन्वाख्यानेन प्रतिपादितम्। भाष्येऽपि भूशब्दः प्रकृतिः अतिशब्दस्तु प्रत्यय इत्युक्तम्। अधुनादीनां चापे······ण रूपाणां न कश्चिदर्थः प्रकल्पितः। केवलं त्वर्थवतो ह्यागमः तद्गुणीभूतस्तद्ग्रहणेन गृह्यते इत्युक्तम् ॥१६८॥

तत्रापि शक्यत्वाशक्यत्वाभ्यामन्वयव्यतिरेकावाश्रित्य तत्प्रतिपादनं कर्तव्यमित्याह—यत्र चेति।

यत्रान्वयव्यतिरेकावुपलभ्येते तत्रैव नियमः[5]। न[6] त्वशक्ये विषय इत्याह—नियम इति।

भवतामत्तीत्यादावसति नुडादावर्थदर्शनादृक्षाणां पचतीत्यादौ तस्य साहाय्यमात्रं स्थापितं न पृथगर्थतेति। उक्तं च—भावकर्मकर्तारः सार्वधातुकार्था इति चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात्। विकरणार्था इति चेत् कृताभिहितेषु विकरणाभाव[7] इति ॥१६८॥

सम्भवे[8] वाऽभिधानस्य लक्षणत्वं[9] न[10] कल्पयते[10]।
आपेक्षिक्यो हि संसर्गे नियताः शब्दशक्तयः ॥१६९॥

अभिधानसंभवे सति यः कश्चिदपि शब्दाभिधेयमर्थमभ्युपगच्छति न तस्य लक्षणभावाभ्युपगमो युक्तः। शब्दसामर्थ्यमेवं सति बाधितं स्यात्। इच्छातश्च सर्वस्य लक्षणत्वमभ्युपगम्येत। तस्मादागमे यस्य सम्प्रत्ययः स तस्याभिधेयत्वेन व्यवस्थाप्यते। यद्यपि केवलानां प्रयोगेष्वदृष्टः त्यसंसर्गोऽप्रविभागा इवावस्थिता-

1. प्रविभागे—का°.
2. यथा—क १.२.५.७, ख। यावच्च—ग१.३.४, वृत्तिकोशः. टीकाकृता धृतः पाठ एव श्रेयानिति मूलकोशेष्वसन्नपि समादृतो मूलानुसारिभिरप्यस्माभिरिति पारतन्त्र्यं नः।
3. तत्त्वेन—ग १.३.४.
4. नियमेन शबादिषु—ग १.३.४.
5. नियतः—का°. अपपाठः.
6. शब्विकरणार्था—का°, ज.
7. पा° महा° भा° ३।३।६७॥ वा १,२॥
8. सम्भवेना-क १.२.५.७.
9. लक्षणं तु—ख, टीकाकोशश्च.
10. न कल्पते—ज। प्रकल्पते-ग१.३.४.

शक्यः तथापि स्वासामितरेतरानपेक्षैवाभिव्यक्तिरभ्युपगम्यते । प्रतिनियमेन कृतप्रविभागा व्यवस्थिताः शब्दानां शक्तयः प्रतिज्ञायन्ते ॥१६९॥

यत्र तु पृथगेव तयोः प्रकृतिप्रत्यययोरर्थवत्त्वं दृश्यते तत्र पृथगर्थाभिधानमेवाङ्गीकार्यं न तूपलक्षणार्थत्वं कल्पनीयमित्याह—सम्भवे इति ।

प्रकृतिप्रत्यययोः पृथगर्थाभिधानसम्भवे प्रकृत्यर्थ एव पदवाच्यः प्रत्ययार्थस्तूपलक्ष्यमाणः, प्रत्ययार्थ एव पदवाच्यः प्रकृत्यर्थस्तूपलक्ष्यमाण इति न युक्ता कल्पना । ननु यदि प्रकृतिप्रत्यययोः पृथक् पृथगर्थमभिधातुं शक्तिरस्ति तत्किमिति परस्परापेक्षितया स्वार्थाभिधानमित्याह—आपेक्षिक्य इत्यादि । यस्मात्संसर्गे प्रकृतिप्रत्ययार्थयोः शब्दशक्तयोन्वयव्यतिरेकापेक्षिता नियता एव प्रातिस्विक्य एवं प्रतीयन्त इति ॥१६९॥

न कूपसूपयूपानामन्वयोऽर्थस्य दृश्यते ।
अतोर्थान्तरवाचित्वं संघातस्यैव गम्यते ॥१७०॥[4]

यदि तर्हि यावत्किंचित्तुल्यरूपं तस्यैकत्वमभ्युपगम्यते, यावांश्च भिन्नोऽर्थः सर्वोऽसौ भिन्नरूपनिबन्धनः प्रतिज्ञायते सत्यपि सम्बन्ध्यन्तराभेदे, तथासति कूपसूपयूपेषु योऽयमर्थभेदः स वर्णमात्रनिबन्धनः प्रयुज्यते । स्यादेतदेवं यदि भेदाभेदावत्र विषये स्याताम् । न त्वभिन्नमस्ति यदूपशब्दोऽनुपतद्विभागव्यवस्थां कुर्यात् । तस्यान्वयाभावाद् विषयाप्रविभागेनाव्यतिरेकेण व्यवतिष्ठत इत्यर्थान्तरनिबन्धनत्वमविभक्तावयवार्थानां समुदायानामाश्रीयते ॥१७०॥

यत्र त्वपेक्षायामपि न पृथगर्थतोपलभ्यते तत्रापोद्धारो नाश्रयणीय इत्याह—न कूपेति ।

न हि एकापगमे कश्चिद्वा कश्चिदर्थानां वेदनोपजायते ॥१७०॥

अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु ।
बहूनां सम्भवेर्थानां निमित्तं किंचिदिष्यते ॥१७१॥

लौकिकस्याभिधेयस्याभेदेन सव्यापारमुपलक्षणभूतं वा निमित्तमुपादायोपादाय विशिष्टैः साधुविषयाणि निपातनेन लक्षणेन वा क्रियमाणशब्दव्युत्पत्तिकर्मसु बहुधा भिन्नान्यन्वाख्यानानि दृश्यन्ते । अनेकशाखितयुक्तेऽर्थे या काचिन्निमित्तभावेनाश्रीयमाणा शक्तिः साधुत्वान्वाख्यानेऽङ्गत्वं प्रतिपद्यते । तद्यथा तृम्फ्लुटितनिताडिभ्य उलच् तपश्च । शक्यो ह्यन्येभ्योपि धातुभ्यः शब्दव्युत्पत्तिकर्मण्युलच्प्रत्ययो विधातुं तण्डादेराश्च कर्तुमिति ॥१७१॥

तदेवं शक्याशक्यावन्वयव्यतिरेकावाश्रित्यापोद्धारेणान्वाख्यानं पदभागयोः कार्यमित्युक्तम् । ततश्च किं सनिमित्तमथ निर्निमित्तमेवेत्याशङ्क्य सनिमित्तमेव पदभागयोः पदस्य चान्वाख्यानं कार्यमितीदानीमुपपादयितुमाह—अन्वाख्यानानि इति ।

१. इव—का०, ज.
२. कूपयूपसूपानाम्°—क १. २. ५. ७, ज.
३ विद्यते—ग १. ३. ४, कैयटश्च.
४. इदं ११।२ सूत्रभाष्यप्रदीपे संगृहीतम् ।
५. सधाख्यानानि—क १. २. ५. ७.
६. किंचिदुच्यते—टीकाकोशाः.

यत्र खलु बहूनि निमित्तानि सम्भवन्ति तत्र किंचिदेवानैयत्येनाश्रित्यान्वाख्यानं क्रियत इत्युच्यते ॥१७१॥

वैरंवासिष्ठगिरिशास्तथैकागारिकादयः ।
कैश्चित्कथंचिदाख्याता निमित्तावधिसंकरैः ॥१७२॥

वीरकर्म वैरं, वीरेषु भवं वैरं, वसिष्ठेन दृष्टं प्रोक्तं वा वासिष्ठं वसिष्ठशब्दोऽस्मिन्वर्तत इति वासिष्ठं, गिरौ डश्छन्दसि गिरिशः गिरौ शेत इति वा, गिरौ शिरा इति वा, ऐकागारिकट् चौरे, ऐकास्सोढाहिंसोरैआगारिकत्विति (?) ऐकागारिक इति वा । तथा तप्पर्वमरुद्भ्यां ददाति वृत्तं चेति निमित्तभूतानामर्थानां प्रकृतिप्रत्ययावधीनां वा नियमेनान्वाख्यातारः प्रवृत्ताः ॥१७२॥

एतदेव दर्शयितुमाह—वैरेति ।

वीरस्येदं वैरं वीराया वा । तथा वसिष्ठस्येदं वसिष्ठेन कृतं प्रोक्तं वा वासिष्ठम् । गिरौ शेते इति गिरौ डश्छन्दसि[3] इति डप्रत्ययेऽथवा गिरिं श्यतीति आतोऽनुपसर्गे कः इति के गिरिश इत्येवं निमित्तावधिसाङ्कर्येणान्वाख्यानं कृतम् ॥१७२॥

यथा पथः समाख्यानं वृक्षवल्मीकपर्वतैः ।
अविरुद्धं गवादीनां भिन्नैश्च सहचारिभिः ॥१७३॥

एकस्य हि मार्गादेः प्रतिपत्तव्यस्यार्थस्य कश्चिदन्वाख्याता वृक्षेणान्वाख्यानमपरो वल्मीकेनान्यः पर्वतादिभिः करोति । सर्वेषां हि तेषां सन्निधानात्प्रतिपादकत्वमप्रतिषिद्धम् । गवादीनां चार्थानां सम्बन्धिभिर्जातिगुणस्वाङ्गसंयोजनादिभिः सर्वथा प्रतिपादनं क्रियते ॥१७३॥

ननु नियतमेव निमित्तमत्र किंचिदुच्यतामित्याशङ्क्योपायानामनियतत्वादनियतमिति प्रतिपादयितुमाह—यथेति ।

यथा वृक्षादिभिर्भिन्नैरुपायभूतैरेव कस्यचित् पथः समाख्यानमविरुद्धम् । तथा गवादीनां शब्दानां भिन्नैरेव सहचारिभिरन्वाख्यानमिति बोद्धव्यम् ॥१७३॥

अन्यथा च समाख्यानमवस्थाभेददर्शिभिः ।
क्रियते किंशुकादीनामेकदेशावधारणात् ॥१७४॥

कश्चिद्धि काञ्चिच्छवितं पश्यति । स यथादर्शनं तद् व्याचष्टे । पदार्थे वाक्यार्थे वा तुल्यरूपमपि पदं कचिदेव कयाचिच्छक्त्यानुग्रहं करोति । ततश्च वाक्यात्पदस्यापोद्धारे क्रियमाणे सा शक्तिर्निमित्तत्वेनाश्रीयते । नियतकालावधयो

१. चिदेव नैयत्येना°—का°, ज.
२. वैनवा°—क १.२.५.७.
३. पा० महा० भा० ३।२।१५॥ वा० ४॥
४. पा० ३।१।३
५. पथ—क १.२.५ । पथां—वृत्तिकोशः.
६. वृषवल्लिकपर्वतैः—ग १.३.४.
वृक्षवल्लीक°—वृत्तिकोशः.
७. °देशावधारणम्—क १.२.५.७, ग१.३.४, ख ५ । °देशेवधारणात्—ख. १.२.३.

इशक्तयः तथापि स्वासामितरेतरानपेक्षैवाभिव्यक्तिरभ्युपगम्यते । प्रतिनियमेन कृतप्रविभागा व्यवस्थिताः शब्दानां शक्तयः प्रतिज्ञायन्ते ॥१६९॥

यत्र तु पृथगेव तयोः प्रकृतिप्रत्यययोरर्थवत्त्वं दृश्यते तत्र पृथगर्थाभिधानमेवाङ्गीकार्यं न तूपलक्षणार्थत्वं कल्पनीयमित्याह—सम्भवे इति ।

प्रकृतिप्रत्यययोः पृथगर्थाभिधानसम्भवे प्रकृत्यर्थ एव पदवाच्यः प्रत्ययार्थस्तूपलक्ष्यमाणः, प्रत्ययार्थ एव पदवाच्यः प्रकृत्यर्थस्तूपलक्ष्यमाण इति न युक्ता कल्पना । ननु यदि प्रकृतिप्रत्यययोः पृथक् पृथगर्थमभिधातुं शक्तिरस्ति तत्किमिति परस्परापेक्षितया स्वार्थाभिधानमित्याह—आपेक्षिक्य इत्यादि । यस्मात्संसर्गे प्रकृतिप्रत्ययार्थयोः शब्दशक्तयोन्वयव्यतिरेकापेक्षिता नियता एव प्रातिस्विक्य एवं प्रतीयन्त इति ॥१६९॥

न कूपसूपयूपानामन्वयोऽर्थस्य दृश्यते[2] ।
अतोर्थान्तरवाचित्वं संघातस्यैव गम्यते ॥१७०॥[4]

यदि तर्हि यावत्किंचित्तुल्यरूपं तस्यैकत्वमभ्युपगम्यते, यावांश्च भिन्नोऽर्थः सर्वोऽसौ भिन्नरूपनिबन्धनः प्रतिज्ञायते सत्यपि सम्बन्ध्यन्तराभेदे, तथासति कूपसूपयूपेषु योऽयमर्थभेदः स वर्णमात्रनिबन्धनः प्रयुज्यते । स्यादेतदेवं यदि भेदाभेदावत्र विषये स्याताम् । न त्वभिन्नमस्ति यदूपशब्दोऽनूपतद्विभागव्यवस्थां कुर्यात् । तस्यान्वयाभावाद् विषयाप्रविभागेनाव्यतिरेकेण व्यवतिष्ठत इत्यर्थान्तरनिबन्धनत्वमविभक्तावयवार्थानां समुदायानामाश्रीयते ॥१७०॥

यत्र त्वपेक्षायामपि न पृथगर्थतोपलभ्यते तत्रापोद्धारो नाश्रयणीय इत्याह—न कूपेति ।

न हि एकापगमे क चिदा का चिदर्थानां वेदनोपजायते ॥१७०॥

अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु[5] ।
बहूनां सम्भवेर्थानां निमित्तं किं चिदिष्यते[6] ॥१७१॥

लौकिकस्याभिधेयस्याभेदेन सव्यापारमुपलक्षणभूतं वा निमित्तमुपादायोपादाय विशिष्टैः साधुविषयाणि निपातनेन लक्षणेन वा क्रियमाणशब्दव्युत्पत्तिकर्मसु बहुधा भिन्नान्यन्वाख्यानानि दृश्यन्ते । अनेकशक्तियुक्तेऽर्थे या काचिन्निमित्तभावेनाश्रीयमाणा शक्तिः साधुत्वान्वाख्यानेऽङ्गत्वं प्रतिपद्यते । तद्यथा तृम्फुटिनिताडिभ्य उलच् तपडश्च । शक्यो ह्यन्येभ्योपि धातुभ्यः शब्दव्युत्पत्तिकर्मण्युलच्प्रत्ययो विधातुं तण्डादेशश्च कर्तुमिति ॥१७१॥

तदेवं शक्याशक्यावन्वयव्यतिरेकावाश्रित्यापोद्धारेणान्वाख्यानं पदभागयोः कार्यमित्युक्तम् । ततश्च किं सनिमित्तमथ निर्निमित्तमेवेत्याशङ्क्य सनिमित्तमेव पदभागयोः पदस्य चान्वाख्यानं कार्यमितीदानीमुपपादयितुमाह—अन्वाख्यानानि इति ।

१. इव—का०, ज.
२. कूपयूपसूपानाम्°—क १. २. ५. ७, ज.
३ विद्यते—ग १. ३. ४, कैयटश्च.
४. इदं १।१।२ सूत्रभाष्यप्रदीपे संगृहीतम् ।
५. अथाख्यानानि—क १. २. ५. ७.
६. किंचिदुच्यते—टीकाकोशाः.

यत्र खलु बहूनि निमित्तानि सम्भवन्ति तत्र किं चिदेवानियतेनाश्रित्यान्वाख्यानं क्रियत इत्युच्यते ॥१७१॥

वैरंवासिष्ठगिरिशास्तथैकागारिकादयः[2] ।
कैश्चित्कथं चिदाख्याता निमित्तावधिसंकरैः ॥१७२॥

वीरकर्म वैरं, वीरेषु भवं वैरं, वसिष्ठेन दृष्टं प्रोक्तं वा वासिष्ठं वसिष्ठशब्दोऽस्मिन्वर्तत इति वासिष्ठं, गिरौ डश्छन्दसि गिरिशः गिरौ शेत इति वा, गिरौ शिरा इति वा, ऐकागारिकट् चौरे, ऐकास्सोढाहिंसोरैऽऽगारिकत्विति (?) ऐकागारिक इति वा । तथा तप्पर्वमरुद्भ्यां ददाति वृत्तं चेति निमित्तभूतानामर्थानां प्रकृतिप्रत्ययावधीनां वा नियमेनान्वाख्यातारः प्रवृत्ताः ॥१७२॥

एतदेव दर्शयितुमाह—वैरेति ।

वीरस्येदं वैरं वीराया वा । तथा वसिष्ठस्येदं वसिष्ठेन कृतं प्रोक्तं वा वासिष्ठम् । गिरौ शेते इति गिरौ डश्छन्दसि[3] इति डप्रत्ययेऽथवा गिरिं श्यतीति आतोऽनुपसर्गे कः इति के गिरिश इत्येवं निमित्तावधिसाङ्कर्येणान्वाख्यानं कृतम् ॥१७२॥

यथा पथः[5] समाख्यानं वृक्षवल्मीकपर्वतैः[6] ।
अविरुद्धं गवादीनां भिन्नैश्च सहचारिभिः ॥१७३॥

एकस्य हि मार्गादेः प्रतिपत्तव्यस्यार्थस्य कश्चिदन्वाख्याता वृक्षेणान्वाख्यानमपरो वल्मीकेनान्यः पर्वतादिभिः करोति । सर्वेषां हि तेषां सन्निधानात्प्रतिपादकत्वमप्रतिषिद्धम् । गवादीनां चार्थानां सम्बन्धिभिर्जातिगुणस्वाङ्गसंयोजनादिभिः सर्वथा प्रतिपादनं क्रियते ॥१७३॥

ननु नियतमेव निमित्तमत्र किं चिदुच्यतामित्याशङ्क्योपायानामनियतत्वादनियतमिति प्रतिपादयितुमाह—यथेति ।

यथा वृक्षादिभिर्भिन्नैरुपायभूतैरेव कस्य चित् पथः समाख्यानमविरुद्धम् । तथा गवादीनां शब्दानां भिन्नैरेव सहचारिभिरन्वाख्यानमिति बोद्धव्यम् ॥१७३॥

अन्यथा च समाख्यानमवस्थाभेददर्शिभिः ।
क्रियते किंशुकादीनामेकदेशावधारणात्[7] ॥१७४॥

कश्चिद्धि काश्चिच्छवितं पश्यति । स यथादर्शनं तद् व्याचष्टे । पदार्थे वाक्यार्थे वा तुल्यरूपमपि पदं क्वचिदेव कया चिच्छक्त्यानुग्रहं करोति । ततश्च वाक्यात्पदस्यापोद्धारे क्रियमाणे सा शक्तिर्निमित्तत्वेनाश्रीयते । नियतकालावधयो

१. चिदेव नैयत्येना°—का°, ज.
२. वैनवा°—क १.२.५.७.
३. पा० महा० भा० ३।२।१५॥ वा० ४॥
४. पा० ३।१।३
५. पथ—क १.२.५ । पथां—वृत्तिकोशः.
६. वृषवल्लिकपर्वतैः—ग १.३.४. वृक्षवल्लीक°—वृत्तिकोशः.
७. °देशावधारणम्—क १.२.५.७, ग १.३.४, छ ५ । °देशेवधारणात्—ख. १.२.३.

वा शक्तिविशेषाः प्रतिकालं केचित् शब्दविशेषेणोपादीयमानाः साधुत्वे निमित्तत्वेनावतिष्ठन्ते । ते च प्रतिकालं तथैवान्वाख्यातृभिः शिष्टैः परिगृह्यन्ते । पर्यायेण समुच्छ्रिता विरोधिन्य एकस्यापरिमाणाः शक्तयो रूपभेदं दर्शयन्ति । तत्र च विरुद्धैर्निमित्तैरुपलक्षणं किंशुकानामिव कालभेदे शक्तौ कस्यां चिच्छब्दस्य व्यवस्थायां न विरुध्यते ॥१७४॥

अर्थस्य चावस्थाभेदा बहवः सन्ति, येन च योऽवस्थाभेदः परिदृष्टस्तेनैवासौ तत्समाख्यानं[1] करोतीत्याह—अन्यथा च इति ।

किं शुको नेति[2] किंशुकशब्दं प्रयुञ्जते इति भिन्नमेव निमित्तम् ॥१७४॥

कैश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः ।
गवतेर्गदतेर्वापि[3] गौरित्यत्रानुदर्शितम्[4] ॥१७५॥

यथैव हि गमिक्रिया जात्यन्तरैकार्थसमवायिनीभ्यो गमिक्रियाभ्योऽत्यन्तभिन्ना तुल्यरूपत्वविधौ त्वन्तरेणैव गमिमाभिधीयमाना गौरितिशब्दव्युत्पत्तिकर्मणि निमित्तत्वेनाश्रीयते तथैव गिरति गर्जति गदति इत्येवमादयः साधारणास्सामान्यशब्दनिबन्धनाः क्रियाविशेषास्तैस्तैराचार्यैर्गोशब्दव्युत्पादनक्रियायां परिगृहीताः । व्युत्पत्तिवाक्यस्थेभ्यो व्याख्यानपदेभ्यः सरूपान्वर्णानुपादाय तत्सङ्घात इव थि पदमन्वाख्यायते यावद्धात्वर्थमात्रा सनादिमात्रा वा यास्वृक्षु वा (?) वाक्यार्थानुग्राहिणी लभ्यते । यथा ह्यादित्य इत्येकस्मिन्नेवाम्नायवाक्ये तद्धितार्थेनापत्येन सम्बन्धो दृश्यते । वाक्यान्तरसम्बन्धीनि तु तस्मिन्नादित्यशब्दे निर्वचनान्तराणि क्रियन्ते । यदि निर्वचनेषु विषयानपेक्षं व्युत्पत्तिमात्रं क्रियते सर्वो रूढिशब्दः सर्वेभ्यो धातुभ्यो रूढानुगममात्रायां तण्डुलादिवच्च प्रकृत्यादेशान्कृत्वा व्युत्पाद्येत । सर्वत्र हि रूढ्यर्थे सर्वनिमित्तं सम्भवति ॥१७५॥

एतदेव व्यक्तीकर्तुमाह—कैश्चित् इति ।

गोलक्षणस्यार्थस्य नानाविधा अवस्था दृष्टाः, तदनुगमेनैवार्थमाहुराचार्याः ॥१७५॥

गौरित्येव स्वरूपाद् वा गोशब्दो गोषु वर्तते ।
व्युत्पाद्यते न[5] वा सर्वः कैश्चिच्चोभयथेष्यते[6] ॥१७६॥

अपरे त्वाचार्या औक्थिक्यादयः गौः कस्मात्, गौरित्येव गौरिति निर्वचनमाहुः । गोशब्दवाच्यो गोशब्देन नित्यसम्बद्धः । तस्माद्गौरिति वाक्यार्थे पदार्थमात्राशक्तिविशेषसन्निवेशनार्थं विशिष्टं वक्ष्यामीति व्युत्पत्तिरारभ्यते । अजाश्वो वा पृथूकं वा पादीयं (?)भृत्यभरणीय इत्येवमादिषु । भाष्ये तु द्वावपि पक्षावेकैकस्मिन्नेव कार्यार्थमाश्रितौ । कश्चिद्धि परमार्थमेव निश्चित्य शास्त्रव्यवहारो व्यवतिष्ठते । कश्चित्साधुप्रतिपादनोपायं शास्त्रसमयमेवापेक्षते । शास्त्रगतो व्यवहारस्तत्रापरमार्थः धातुप्रत्ययादिभेददर्शनं च । एकत्वादिवृत्तिभेदस्तु[1] तदा यो यथैव धातुरूपाणि तथाभ्युपगम्यते । व्यवहारपक्षे तु धातवोऽपि कैश्चिद्वर्णाश्च धात्वन्तरेभ्यो वर्णान्तरेभ्यश्च प्रकृतिप्रत्ययाद्यनुगमेन व्युत्पाद्यन्ते ॥१७६॥

एवं शब्दस्य प्रकृतिवाच्यमेव निमित्तम् । ततश्च बहुविधनिमित्तप्रदर्शनम् । इदानीं स्वरूपमेव शब्दानां प्रवृत्तिनिमित्तमन्वाख्यानायोपादीयत इति पक्षं प्रदर्शयितुमाह—गौरित्येवेति ।

अथ कस्माद् गौरित्युच्यते । गौरित्येव हि गौर्गवि वर्तते इत्यौक्थिक्याः । अतश्च स्वरूपमात्रप्रयुक्ताः सर्वे शब्दा इत्यव्युत्पत्तिपक्ष एवेत्याह—व्युत्पाद्यते न वा सर्वम् इति ।

कैश्चित्स्वरूपं वाच्यं च निमित्तमुच्यत इत्याह—कैश्चिच्चेति ।

एवं सनिमित्तमन्वाख्यानम् । निमित्तं च वाच्यं बहुधा कैश्चित्कथं चित्किंचिदुक्तम् । स्वरूपं निमित्तमुभयमेव वेति दर्शितम् ॥१७६॥

सामान्येनोपदेशश्च शास्त्रे लघ्वर्थमाश्रितः ।
जात्यन्तरवदस्यापि विशेषाः प्रतिपादकाः ॥१७७॥

इह रूपानुगमेनार्थानुगमेन वा यावत्सामान्येनोपदेष्टुं शक्यते तावदुपदिश्यते । विशेषस्त्वर्थविषयो रूपविषयो वा जात्यन्तरयुक्तमिवान्यं शब्दमन्यमिव चार्थं प्रतिपादयति । तत्र यो रूढिविषयो गम्यर्थः, नासौ प्राकृते गमनमात्रे वर्तते । यथैव स्रवति स्पन्दते प्लवते पतति गतिसामान्येऽपि पठिता गतिविशेषं सामान्यमात्रयानुगम्यमानं स्वभावादवलम्बन्ते तथा गौरित्यत्र प्रतिपत्तव्यम् । न चावश्यमत्र गमिः पादविहरणे क्रियते । एवं यावन्ति रूढिशब्दार्थविशिष्टा क्रिया संभवन्ति सर्वत्रानेकार्थत्वाद्धातूनां प्रवृत्तिरप्रतिषिद्धा गमेः । दृष्टं चेदं गुरुतल्पगादिषु व्यापारान्तरविषयत्वं गमेः । यथैव रूढिषु क्रियाणां फलरूपभेदः तथा कारकभेदोऽपि । तस्माद्रूढिषु जात्यन्तरवत् सामान्याभिधानेऽप्यर्थान्तरप्रतिपत्तिरिति ॥१७७॥

इदानीं किं भिन्नमेव रूपं शब्दस्य आहोस्विदभिन्नमिति विचार्यते । यदि भिन्नमेव तदा गमनं गरलं गज इत्यादिषु गादीनां भिन्नत्वाद्भेदेनैवोपादानं प्राप्नोति । ततश्चानन्त्यादशक्यत्वमन्वाख्यानस्येत्याह— सामान्येति ।

शब्दभेददर्शने भिन्नानां सामान्यसमाश्रयेण लाघवादुपदेशः शास्त्रे क्रियते । विशेषा ये तेऽस्यैव जात्यन्तरवत्प्रतिपादका उच्यन्ते[2] ॥१७७॥

१. तत्समाख्यानं—का°. अपपाठः.
२. शुकेनेति—क १.५.
३. °गदतेर्वा°—क १.२, ख. नायं युक्तः पाठः । न वा शास्त्रकारस्याभिमत इति भाष्यटीकातो ज्ञायते । तत्र हि गोशब्दव्युत्पत्तिं प्रदर्शयामास हरिः—गच्छति गदति गर्जति वा गौरिति । गुवतेर्ग°—ख २.३. (पृष्ठप्रान्ते), ज । गडतेर्ग—ग १.३.४.
४. °नुदर्शनम्—क १.२.५.७, ख.
५. यथा—क १.२.४.७.
६. भयमिष्यते—का०. मूलकोशेषु टीकाकोशेषु वा न क्वचिदिदमुपलभ्यत इत्यप्रमाणम् ।

१. एकत्वाद् व्यावृत्तिभेदस्स—वृत्तिकोशः. स यथामति शोधितः ।
२. °दन्नस्य—क १.२.५.७, ग १ । जात्यन्तरपदं न्यस्य—ग ३.४.

अत उपक्रम एवाख्याते विशिष्टैव धातुवाच्या क्रिया निर्वर्तयितुमुपक्रम्यत इत्याख्यातानां स्वरूपप्रदर्शनार्थमाह—क्रियाविशेषाः इत्यादि । संघातैर्धातूपसर्गसमुदायैरित्यर्थः । तथाविधा अभिन्ना भिन्ना वा ॥१८२॥

कार्याणामन्तरङ्गत्वमेवं[1] धातूपसर्गयोः ।
साधनैर्याति[2] सम्बन्धं तथाभूतैव सा क्रिया ॥१८३॥

उपसर्गसम्बन्धाधीना स्वार्थव्यवस्था धातूनाम् । स्वार्थयोगे च सिद्धे सम्बन्ध्यन्तरस्य सन्निधानेन भवितव्यम् । तत्र गौरखरादिवत् विशिष्टार्थे प्रकृतिरूपे प्रतिलब्धे बाह्याः सम्बन्धिन उपजायन्ते । तस्माद् विशिष्टप्रकृतिरूपवाच्या विशिष्टा क्रिया तथाभूतैव साध्या सती साधनसम्बन्धं प्रतिपद्यते ॥१८३॥

अतः किं भवतीत्याह—कार्याणाम् इति ।

एवं धातूपसर्गाश्रयाणि यानि कार्याण्यन्तरङ्गाणीत्युच्यन्ते[3] इति पूर्वं तान्येव प्रवर्तन्ते यथा सुडादयः ।

तथाभूतैव च सा क्रिया साधनसम्बन्धं गच्छतीत्याह—साधनैरिति ।

तथाभूतैव उपसर्गविशिष्टैव कारकसंबन्धमुपगच्छन्ती । एवं चानुभूयत इत्यत्र कर्मणि लकारः सिध्यति । तथा षत्वतुकोरसिद्धः[4] इत्यारम्भणीयम् । अडभ्यासव्यवायेऽपि[5] इत्यनारम्भणीयमेवेति स्थितम् । उक्तं च—कारकाणां प्रवृत्तिर्विशिष्टक्रियायाम्[6] । अन्यथा कृत्वा मांसौदने प्रवर्तन्ते अन्यथा च शुष्कौदने[7] इति । वृत्तोपसर्गसम्बन्धायाश्च तस्या वैशिष्ट्यमिति क्रमाश्रयणेन पूर्वमेवोपसर्गेण सम्बन्धः ॥१८३॥

प्रयोगार्हेषु सिद्धः सन्भेत्तव्योऽर्थो[8] विशिष्यते ।
प्राक् च साधनसम्बन्धात्क्रिया नैवोपजायते ॥१८४॥

इह प्रसिद्धं विशेष्यमनेकप्रकारसंभवे सति दृष्टप्रयोगेण शब्देनाभिधीयमानं विशेषणविशेष्यभावं प्रतिपद्यते । साध्यत्वाच्च क्रियायाः साधनसम्बन्धनिर्वृत्तिः । तस्मात्प्राक् साधनसम्बन्धादनुपजाता क्रिया निरात्मिका द्योतकेनोपसर्गेण सह विशेषणविशेष्यसम्बन्धं नोत्सहते प्रतिपत्तुम् । पूर्वं धातुः साधनेन युज्यत इत्येकेषां दर्शनम् ॥१८४॥

1. °मेव—ज.
2. र्यदि सम्बन्धः—ग ३.४. । °र्यदि सम्बन्धं—ग१. भ्रष्टः पाठः.
3. °रङ्गाण्युच्यन्ते—ज.
4. पा० ६।१।८६॥
5. पा०महा०भा०६।१।१३५॥ वा० ५,६॥
6. क्रियायाः—छ१, ज.
7. पा०महा० भा० १।३।१॥११ वार्तिके । तत्र कारकाणां प्रवृत्तिविशेषः क्रिया इति पाठभेदः।
8. प्रयोगार्हेषु—र्थो इत्यस्य स्थाने प्रयोगार्हेषु सिद्धैः सत् भेत्तव्यो हि—ग१.३.४. भ्रष्ट एष पाठस्त्रयाणमेतेषां कोशानामादितोऽभिन्नमूलकत्वं प्रसाधयति ।

अत उपक्रम एवाख्याते विशिष्टैव धातुवाच्या क्रिया निर्वर्तयितुमुपक्रम्यत इत्याख्यातानां स्वरूपप्रदर्शनार्थमाह—क्रियाविशेषा: इत्यादि । संघातैर्धातूपसर्गसमुदायैरित्यर्थ: । तथाविधा अभिन्ना भिन्ना वा ॥१८२॥

कार्याणामन्तरङ्गत्वमेवं[1] धातूपसर्गयोः ।
साधनैर्याति[2] सम्बन्धं[3] तथाभूतैव सा क्रिया ॥१८३॥

उपसर्गसम्बन्धाधीना स्वार्थव्यवस्था धातूनाम् । स्वार्थयोगे च सिद्धे सम्बन्ध्यन्तरस्य सन्निधानेन भवितव्यम् । तत्र गौरखरादिवत् विशिष्टार्थे प्रकृतिरूपे प्रतिलब्धे बाह्याः सम्बन्धिन उपजायन्ते । तस्माद् विशिष्टप्रकृतिरूपवाच्या विशिष्टा क्रिया तथाभूतैव साध्या सती साधनसम्बन्धं प्रतिपद्यते ॥१८३॥

अतः किं भवतीत्याह—कार्याणाम् इति ।

एवं धातूपसर्गाश्रयाणि यानि कार्याण्यन्तरङ्गाणीत्युच्यन्ते[3] इति पूर्वं तान्येव प्रवर्तन्ते यथा सुडादयः ।

तथाभूतैव च सा क्रिया साधनसम्बन्धं गच्छतीत्याह—साधनैरिति ।

तथाभूतैव उपसर्गविशिष्टैव कारकसंबन्धमुपगच्छन्ती । एवं चानुभूयत इत्यत्र कर्मणि लकारः सिध्यति । तथा षत्वतुकोरसिद्धः इत्यारम्भणीयम्[4] । अडभ्यासव्यवायेऽपि[5] इत्यनारम्भणीयमेवेति स्थितम् । उक्तं च—कारकाणां प्रवृत्तिर्विशिष्टक्रियायाम्[6] । अन्यथा कृत्वा मांसौदने प्रवर्तन्ते अन्यथा च शुष्कौदने[7] इति । वृत्तोपसर्गसम्बन्धायाश्च तस्या वैशिष्ट्यमिति क्रमाश्रयणेन पूर्वमेवोपसर्गेण सम्बन्धः ॥१८३॥

प्रयोगार्हेषु सिद्धः सन्भेत्तव्योऽर्थो[8] विशिष्यते ।
प्राक् च साधनसम्बन्धात्क्रिया नैवोपजायते ॥१८४॥

इह प्रसिद्धं विशेष्यमनेकप्रकारसंभवे सति दृष्टप्रयोगेण शब्देनाभिधीयमानं विशेषणविशेष्यभावं प्रतिपद्यते । साध्यत्वाच्च क्रियायाः साधनसम्बन्धनिर्वृत्तिः । तस्मात्प्राक् साधनसम्बन्धादनुपजाता क्रिया निरात्मिका द्योतकेनोपसर्गेण सह विशेषणविशेष्यसम्बन्धं नोत्सहते प्रतिपत्तुम् । पूर्वं धातुः साधनेन युज्यत इत्येकेषां दर्शनम् ॥१८४॥

१. °मेव—ज.
२. यदि सम्बन्धः—ग ३,४. । °र्यदि सम्बन्धं—ग१. भ्रष्टः पाठः.
३. °रङ्गाण्युच्यन्ते—ज.
४. पा० ६।१।८६॥
५. पा०महा०भा०६।१।१३५॥ वा० ५,६॥
६. क्रियायाः—छ१, ज.
७. पा०महा० भा० १।३।१॥११ वार्तिके । तत्र कारकाणां प्रवृत्तिविशेषः क्रिया इति पाठभेदः।
८. प्रयोगार्हेषु—र्थो इत्यस्य स्थाने प्रयोगार्हेषु सिद्धैः सत भेत्तव्यो हि—ग१,३,४. भ्रष्ट एष पाठस्त्रयाणमेतेषां कोशानामादितोऽभिन्नमूलकत्वं प्रसाधयति ।